


महान्यासम्






महान्यास विषयानुवाकः

१३ ॥ शिवसहस्योक्त गणेशकृत रुद्रनमकम् - 202 to 213.

१४ ॥ शिवसहस्योक्त शिलादाकृत चमकम् - 213 to 221.

Total: 221 Pages.

Note:

प्रजनने	Prajanane	Part Below abdomen
शिखायै	Shikaayai	Centre of the head and the hair there.
ललाटाय	Lalaataaya	Forehead
नेत्राभ्यां	Netraabhyaam	Two eyes
नासिकायै	Naasikaayai	Nose
खण्टाय	Kantaaya	Neck
बाहुभ्यां	Baahubhyaam	Shoulders
उदराय	Udaraaya	Stomach
पृष्ठाय	Prushtaaya	Back side
जटराय	Jataraaya	Inner stomach
कट्यायै	Katyai	Hip
अण्डाभ्याम्	Andaabhyaam	Testicles
ऊरूभ्याम्	Oorubhyaam	Thighs
जङ्गाभ्याम्	Jangaabhyaam	Ankle
पादाभ्याम्	Paadaabhyaam	Feet
शिरस्	Shiras	Head
भ्रूवोर्मध्याय	Bhruvormadhyaaya	Space between eye brow
कर्णाभ्याम्	Karnaabhyaam	Two ears
मुखाभ्याम्	Mukhayaam	Face
उपकण्ठाय	Upakantaaya	Back side of neck




महान्यासम्



उप बाहुभ्याम्	Upa Baahubhyaam	Space between wrist and Shoulders
मणिबन्धाभ्याम्	Mani Bandhaabhyaam	Wrist
हस्ताभ्याम्	Hasthaabhyaam	Palm
हृदयाय	Hrudayaaya	Heart
कक्षाभ्याम्	Kakshaabhyaam	Arm Pit
पार्श्वाभ्याम्	Paarshvaabhyaam	Side of the ribs
नाभ्यै	Naabhyai	Belly button or navel
गुह्याय	Guhyaaya	Private parts
अपानाय	Apaanaaya	Anus
जानुभ्याम्	Jaanubhyaam	Knee
गुल्फाभ्याम्	Gulphaabhyaam	Calf muscle
कवचाय	Kavachaaya	Right hand to touch left shoulder and left hand to touch right shoulder
अङ्गुष्ठाभ्याम्	Angushtaabhyaam	Thumb
तर्जनीभ्याम्	Tharjaneebhyaam	Index Finger
मध्यमाभ्याम्	Madhyamaabhyaam	Ring Finger
कनिष्ठिकाभ्याम्	Kanishtikabhyaam	Small Finger
अस्त्राय फट्	Astraya phatu	Tapping the left hand inner palm with the index finger and middle finger making a nose by rubbing.
नेत्रत्रयाय वौषट्	Netratrayaaya vowshat	Right index finger to close right eye, middle finger to touch the third eye in the fore-head, ring finger to close the left eye at the same time.

ॐ श्री गुरुभ्यो नमः ॥ हरिः ॐ ॥

ॐ अच्युताय नमः । ॐ अनन्ताय नमः । ॐ गोविन्दाय नमः ॥

ॐ गणानान्त्वा गणपतिꣳहवामहे कविङ्कवीनामुपवश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणाम् । ब्रह्मणस्पत आनस्श्रृण्वन्नूतिभिस्सीद सादनम् ॥

ॐ श्री महा गणपतये नमः ॥

 

महान्यासम्



ॐ भूः । ॐ भुवः । ॐ॰ सुवः। ॐ महः। ॐ जनः। ॐ तपः।

ॐ॰ सत्यम्। ....

ॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐ

श्री महा गणपतये नमः ॥

श्री महा गणपति अथर्वशीर्षोपनिशत्

श्री महा गणपतये नमः ॥

ॐ भद्रं कर्णेभिः श्रृणुयाम देवाः। भद्रं पश्येमाऽक्षभिर्यजत्राः॥

स्थिरैरङ्गैस्तुष्टुवाꣳ सस्तनूभिः । व्यशेम देवहितं यदायुः ।

स्वस्तिन इन्द्रो वृद्धश्रवाः। स्वस्तिनः पूषा विश्ववेदाः।

स्वस्तिनस्ताक्ष्यों अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु

॥ ॐ शान्तिः शान्तिः शान्तिः ॥ *इति श्री महागणपति अथर्वशीर्षोपनिशत्व्याख्यास्यामः॥* ॐ लं नमस्ते गणपतये । त्वमेव प्रत्यक्षं तत्त्वमसि। त्वमेव केवलं कर्तासि । त्वमेव केवलं धर्तासि ।

त्वमेव केवलं हर्तासि । त्वमेव सर्वं खल्विदं

ब्रह्मासि । त्वं साक्षादात्मासि नित्यम् ॥

ऋतं वच्मि । सत्यं वच्मि ॥

अव त्वं माम् । अव वक्तारम् । अव श्रोतारम् ।

अव दातारम् । अव धातारम् ।

अवानूचानमवशिष्यम् । अव पश्चात्तात् ।

अव पुरस्तात् । अवोत्तरात्तात् ।

अव दक्षिणात्तात् । अव चोर्ध्वात्तात् ।

अवाधरात्तात् । सर्वतो मां पाहि पाहि समन्तात् ॥

त्वं वाङ्मयस्त्वं चिन्मयः ।

त्वमानन्दमयस्त्वं ब्रह्ममयः ।

त्वं सच्चिदानन्दाद्वितीयोऽसि ।

त्वं प्रत्यक्षं ब्रह्मासि ।

त्वं ज्ञानमयो विज्ञानमयोसि ॥

सर्वं जगदिदं त्वत्तो जायते ।

सर्वं जगदिदं त्वत्तस्तिष्ठति ।

सर्वं जगदिदं त्वयि लयमेष्यति ।

सर्वं जगदिदं त्वयि प्रत्येति ।

त्वं भूमिरापोऽनलोऽनिलो नभः ।

त्वं चत्वारि वाक् पदानि ॥

त्वं गुणत्रयातीतः । त्वं अवस्थात्रयातीतः ।

त्वं देहत्रयातीतः । त्वं कालत्रयातीतः ।

त्वं मूलाधारे स्थितोऽसि नित्यम् ।

त्वं शक्ति त्रयात्मकः ।

त्वां योगिनो ध्यायन्ति नित्यम् ।

त्वं ब्रह्मा त्वं विष्णुस्त्वं

रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं

चन्द्रमास्त्वं ब्रह्म भूर्भुवस्सुवरोम् ॥

गणादिं पूर्वमुच्चार्य वर्णादिं तदनन्तरम् ।

अनुस्वारः परतरः। अर्धेन्दुलसितम्। तारेण ऋद्धम्।

एतत्तव मनुस्वरूपम् । गकारः पूर्वरूपम् ।

अकारो मध्यम रूपम् । अनुस्वारश्चान्त्यरूपम् ।

बिन्दुरुत्तररूपम्। नादः सन्धानम्। सꣳहिता सन्धिः।

सैषा गणेश विद्या । गणक ऋषिः ।

निश्चृद् गायत्री छन्दः। श्री महागणपतिर् देवता ।

ॐ गं गणपतये नमः ।

ॐ गं गणपतये नमः। ॐ गं गणपतये नमः॥

एकदन्ताय विद्महे वक्रतुण्डाय धीमहि ।

तन्नो दन्तिः प्रचोदयात् ॥

एकदन्तं चतुर्हस्तं पाशमङ्कुश धारिणम् ।

रदं च *(अभयं)* वरदं हस्तैर्बिभ्राणं मूषकध्वजम् ।

रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम् ।

रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैस्सुपूजितम् ।

भक्तानुकंपिनं देवं जगत्कारणमच्युतम् ।

आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् ।

एवं ध्यायति यो नित्यं स योगी योगिनां वरः

॥ नमो व्रातपतये । नमो गणपतये ।

नमः प्रमथपतये । नमस्ते अस्तु

लम्बोदरायैकदन्ताय विघ्नविनाशिने शिवसुताय

(श्री) वरदमूर्तये (नमो) नमः ॥

॥ फलश्रुति ॥

एतद्-अथर्वशीर्शं योऽधीते । स ब्रह्मभूयाय कल्पते ।

स सर्वत्रः सुखमेधते । स सर्वविघ्नैर्न बाध्यते ।

स पञ्चमहापापात्प्रमुच्यते ।

सायमधीयानो दिवसकृतं पापं नाशयति ।

प्रातरधीयानो रात्रिकृतं पापं नाशयति ।

सायं प्रातः प्रयुञ्जानः पापोऽपापो भवति ।

सर्वत्राधीयानोऽपविघ्नो भवति ।

दर्मार्थकाममोक्षञ्च विद्नति ॥

इदं अथर्वशीर्षं अशिष्याय न देयम् ।

यो यदि मोहाद्दास्यति स पापीयान् भवति ॥

सहस्रावर्तनाद्यं यं काममधीते ।

तं तमनेन साधयेत् । अनेन गणपतिमभिषिञ्चति ।

स वाग्मी भवति । चतुर्थ्यामनश्नन् जपति ।

स विद्यावान् भवति ।

इत्यथर्वण वाक्यम् । ब्रह्माद्यावरणं विद्यात् ।

न बिभेति कदाचनेति । यो दूर्वाङ्कुरैर्यजति ।

स वैश्रवणोपमो भवति । यो लाजैर्यजति ।

स यशोवान् भवति । स मेधावान् भवति ।

यो मोदकसहस्रेण यजति । स वाञ्छित

फलमवाप्नोति । यस्साज्यसमिद्भिर्यजति ।

स सर्वं लभते । स सर्वं लभते ।

अष्टौ ब्राह्मणान् सम्यग्ग्राहयित्वा ।

सूर्यवर्चस्वी भवति । सूर्यग्रहे महानद्यां

प्रतिमासन्निधौ वा जप्त्वा। स सिद्धमन्त्रो भवति ।

महाविघ्नात्प्रमुच्यते । महादोषात्प्रमुच्यते ।

महापापात्प्रमुच्यते । *महाप्रत्यवायात्प्रमुच्यते* ॥

स सर्वविद्भवति स सर्वविद्भवति ॥

य एवं वेद ॥ इत्युपनिषत् ।

ॐ भद्रं कर्णेभिः श्रृणुयाम देवाः।

भद्रं पश्येमाऽक्षभिर्यजत्राः॥ स्थिरैरङ्गैस्तुष्टुवाꣳ

सस्तनूभिः। व्यशेम देवहितं यदायुः।

स्वस्तिन इन्द्रो वृद्धश्रवाः। स्वस्तिनः पूषा विश्ववेदाः।

स्वस्तिनस्ताक्ष्र्यो अरिष्टनेमिः। स्वस्ति नो

बृहस्पतिर्दधातु ॥ ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

ॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐ

कलश-स्थापन मन्त्रः

॥ अथ वरुण सूक्तम् ॥

दधिक्राव्णो अकारिष-ञ्जिष्णोरश्वस्य वाजिनः ।

सुरभिनो मुखाकरत्प्रण आयूꣳषितारिषत् ॥

आपो हिष्ठा मयोभुवस्तान ऊर्जे दधातन ।

महे रणाय चक्षसे ॥ यो वश्शिवतमो

रसस्तस्य भाजयतेह नः। उशतीरिव मातरः ॥

तस्मा अरङ्गमामवो यस्य क्षयाय जिन्वथ ।

आपो जनयथा च नः ॥ ॐ भूर्भुवस्सुवः ॥

हिरण्यवर्णाश्शुचयः पावका यासु जातः

कश्यपो यास्विन्द्रः । अग्निँय्या गर्भंद्धिरे

विरूपास्तान आपश्शꣳस्योना भवन्तु ॥१॥

यासाꣳराजा वरुणो याति मद्ध्ये सत्यानृते

अवपश्यञ्जनानाम् । मधुश्चुत श्शुचयो याः

पावकास्तान आपश्शꣳस्योना भवन्तु ॥२॥

यासाद्देवा दिवि कृण्वन्ति भक्षँय्या अन्तरिक्षे

बहुधा भवन्ति । याः पृथिवीं पयसोन्दन्ति

शुक्रास्तान आपश्शꣳस्योना भवन्तु ॥३॥

शिवेन मा चक्षुषा पश्यताप-श्शिवया

तनुवोपस्पृशत त्वचं मे । सर्वाꣳ अग्नीꣳरप्सुषदो

हुवे वो मयि वर्चोबलमोजो निधत्त ॥४॥

यददस्संप्रयतीरहावनदताहते । तस्मादानद्यो

नामस्थतावो नामानि सिन्धवः ।

यत्प्रेषिता वरुणेनताश्शीभँ समवल्गत ।
तदाप्नोदिन्द्रोवो यतीस्तस्मादापो अनुस्थन ।
अपकामँ स्यद्रमाना अवीवरतवोहिकम् ।
इन्द्रोवश्शक्तिभि-र्देवीस्तस्माद्वार्णामवोहितम् ।
एको देवो अप्यतिष्ठत्सयद्रमाना यथावशम् ।
उदानिषुर्महीरिति तस्मादुदकमुच्यते ।
आपो भद्रा घृतमिदाप आसुरग्नीषोमौ
विभ्रत्याप इत्ताः । तीव्रोरसो मधुपृचामरङ्गम
आमा प्राणेन सहवर्चसागन् ।
आदित्पश्याम्युतवाश्रृणोम्यामाघोषो गच्छति
वाङ्ग आसाम् । मन्ये भेजानो अमृतस्य तर्हि
हिरण्यवर्णा अतृपं यदावः ॥ आपो हिष्ठा
मयोभुवस्तान ऊर्जे दधातन । महेरणाय चक्षसे ।

यो वः शिवतमो रसस्तस्य भाजयते हनः ।
उशतीरिव मातरः । तस्मा अरङ्गमामवो यस्य
क्षयाय जिन्वथ । आपो जनयथा च नः ॥
पवमान स्सुवर्जनः । पवित्रेण विचर्षणिः ।
यः पोता स पुनातु मा ॥५॥ पुनन्तु मा
देवजनाः । पुनन्तु मनवो धिया । पुनन्तु विश्व
आयवः ॥६॥ जातवेदः पवित्रवत् । पवित्रेण
पुनाहि मा । शुक्रेण देव दीद्यत् । अग्ने क्रत्वा
क्रतूꣳरनु ॥७॥ यत्ते पवित्रमर्चिषि ।
अग्ने विततमन्तरा । ब्रह्म तेन पुनीमहे ॥८॥
उभाभ्याद्वेव सवितः । पवित्रेण सवेन च ।
इदं ब्रह्म पुनीमहे ॥९॥ वैश्वदेवी पुनती
देव्यागात् ॥ यस्यै बह्वीस्तनुवो वीतपृष्ठाः ।
तया मदन्त-स्सधमाद्येषु । वयꣳस्याम पतयो

रयीणाम् ॥१०॥ वैश्वानरो रश्मिभिर्मा पुनातु ।

वातः प्राणेनेषिरो मयोभूः ।

द्यावापृथिवी पयसा पयोभिः। ऋतावरी यज्ञिये

मा पुनीताम् ॥११॥ बृहद्भिस्सवित-स्तृभिः।

वर्षिष्ठै र्देवमन्मभिः। अग्ने दक्षैः पुनाहि मा ॥१२॥

येन देवा अपुनत। येनापो दिव्यङ्कशः।

तेन दिव्येन ब्रह्मणा । इदं ब्रह्म पुनीमहे ॥१३॥

यः पावमानीरद्ध्येति । ऋषिभि स्संभृतꣳरसम् ।

सर्वꣳ स पूतमश्नाति। स्वदितं मातरिश्विना ॥१४॥

पावमानीर्यो अद्ध्येति । ऋषिभि स्संभृतꣳरसम् ।

तस्मै सरस्वती दुहे। क्षीरꣳसर्पि र्मधूदकम् ॥१५॥

पावमानी स्स्वस्त्ययनीः।

सुदुघा हि पयस्वतीः। ऋषिभि स्संभृतो रसः।

ब्राह्मणेश्वमृतꣳहितम् ॥१६ ॥

पावमानी र्दिशन्तु नः । इमँल्लोकमथो अमुम् ।

कामान्थ्समर्द्धयन्तु नः। देवीर्देवै-स्समाभृताः ॥१७ ॥

पावमानी स्स्वस्त्ययनीः। सुदुघा हि घृतश्चुतः।

ऋषिभि-स्संभृतो रसः। ब्राह्मणेश्वमृतꣳहितम् ॥१८ ॥

येन देवाः पवित्रेण । आत्मानं पुनते सदा ।

तेन सहस्रधारेण । पावमान्यः पुनन्तु मा ॥१९ ॥

प्राजापत्यं पवित्रम् । शतोद्यामꣳ हिरण्मयम्।

तेन ब्रह्मविदो वयम् । पूतं ब्रह्म पुनीमहे ॥२० ॥

इन्द्र स्सुनीती सह मा पुनातु। सोम स्स्वस्त्या

वरुण स्समीच्या। यमो राजा प्रमृणाभिः पुनातु मा।

जातवेदा मोर्जयन्त्या पुनातु। भूर्भुवस्सुवः ॥२१ ॥






ॐ जुम्बकाय विद्महे महावरुणाय धीमही ।
तन्नो वरुण परचोदयात् ॥
ॐ जलबिम्बाय विद्महे नीलपुरुषाय धीमहि ।
तन्नो वरुणः प्रचोदयात् ॥

तच्छँय्योरावृणीमहे । गातुँय्यज्ञाय ।
गातुँय्यज्ञपतये । दैवी स्स्वस्तिरस्तु नः ।
स्वस्ति र्मानुषेभ्यः। ऊद्र्ध्वञ्जिगातु भेषजम् ।
शन्नो अस्तु द्विपदे । शञ्चतुष्पदे ।

ॐ शान्तिः शान्तिः शान्तिः ॥

॥ अथ वरुण सूक्तम् ॥

उदुत्तमँ व्वरुणपाश-मस्मदवाधम-
व्विँमद्ध्यमँश्श्रथाय । अथा वयमादित्यव्रते
तवानागसो अदितये स्याम ॥ अस्तभ्नाद्द्यामृषभो

अन्तरिक्ष-ममिमीत वरिमाणं पृथिव्या

आऽसीद्विश्वा भुवनानि सम्राड्-विश्वेत्तानि

वरुणस्य व्रतानि ॥ यत्किञ्चेदं-वरुण दैव्ये

जनेऽभिद्रोहं मनुष्याश्चरामसि । अचित्ती यत्तव

धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः ॥

कितवासो यद्रिरिपु र्न दीवि यद्वा घा

सत्यमुत यन्न विद्म । सर्वा ता विष्य

शिथिरेव देवथा ते स्याम वरुण प्रियासः ॥

अवते हेडो वरुण नमोभिरव यज्ञेभिरीमहे

हविर्भिः । क्षयन्नस्मभ्यमसुर प्रचेतो

राजन्नेनाꣳसि शिश्रथः कृतानि ॥

तत्त्वा यामि ब्रह्मणा वन्दमान-स्तदाशास्ते

यजमानो हविर्भिः । अहेडमानो

वरुणेहबोद्ध्युरुशꣳस मा न आयुः प्रमोषीः ॥




महान्यासम्



ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमत स्सुरुचो
वेन आवः । स बुद्ध्निया उपमा अस्य विष्ठा
स्सतश्च योनिमसतश्च विवः ॥ नाके
सुपर्णमुपयत्पतन्तꣳहृदा वेनन्तो अभ्यचक्षतत्वा ।
हिरण्यपक्षँव्वरुणस्य दूतँय्यमस्य योनौ शकुनं
भुरण्युम् ॥ आप्यायस्व समेतु ते विश्वत
स्सोम वृष्णियम् । भवा वाजस्य सङ्गथे ॥
योरुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो
विश्वा भुवनाऽऽविवेश तस्मै रुद्राय नमो अस्तु ॥
इदँ व्विष्णु र्विचक्रमे त्रेधा निदधे पदम् ।
समूढमस्य पाꣳसुरे ॥
इन्द्रँ व्विश्वा अवीवृधन्थ्समुद्र व्यचसङ्गिरः ।
रथीतमꣳरथीनाँ व्वाजानाꣳसत्पतिं पतिम् ॥

आपो वा इदꣴसर्वँ-विश्वा भूतान्यापः प्राणा
वा आपः पशव आपोऽन्नमापोऽमृतमाप-
स्सम्राडापो विराडाप-स्स्वराडापश्छन्दाꣳस्यापो
ज्योतीꣳष्यापो यजूꣳष्याप-स्सत्यमाप-स्सर्वा
देवता आपो **भूर्भुवस्सुवराप ॐ** ॥

अपः प्रणयति । श्रद्धा वा आपः ।
श्रद्धामेवारभ्य प्रणीय प्रचरति ॥ अपः प्रणयति ।
यज्ञो वा आपः । यज्ञमेवारभ्य प्रणीय प्रचरति ॥
अपः प्रणयति । वज्रो वा आपः । भ्रातृव्येभ्यः
प्रणीय प्रचरति ॥ अपः प्रणयति । आपो वै
रक्षोघ्नीः । रक्षसामपहत्यै ॥ अपः प्रणयति ।
आपो वै देवानां प्रियन्धाम । देवानामेव
प्रियन्धाम प्रणीय प्रचरति ॥ अपः प्रणयति ।

आपो वै सर्वा देवताः । देवता एवारभ्य प्रणीय प्रचरति ॥ अपः प्रणयति । आपो वै शान्ताः । शान्ताभिरेवास्य शुचꣳशमयति ॥

देवोवस्सवितोत्पुनातु । अच्छिद्रेण पवित्रेण । वासोस्सूर्यस्य रश्मिभिः ॥

कूर्चाग्रै राक्षसान्घोरान् छिन्धि कर्म विघातिनः । त्वामर्पयामि कुम्भेस्मिन्थ्साफल्यं कुरु कर्मणि ॥

वृक्षराज समुद्भूता श्शाखायाः पल्लवत्त्वचः । युष्मान्कुम्भेश्वर्पयामि सर्व पापापनुत्तये ॥

नाळिकेर समुद्भूत त्रिणेत्र हरसम्मत । शिखाया दुरितं सर्वं पापं पीडाञ्च मे नुद ॥

सहि रत्नानि दाशुषे सुवाति सविता भगः । तं भागञ्चित्रमीमहे ॥

तत्त्वायामि ब्रह्मणा वद्ग्मानस्तदाशास्ते यजमानो

हविर्भिः । अहेडमानो वरुणेह बोद्ध्युरुशꣳसमान आयुः प्रमोषीः ॥ तच्छँय्योरावृणीमहे । गातुँय्यज्ञाय । गातुँय्यज्ञपतये । दैवी स्स्वस्तिरस्तु नः । स्वस्ति र्मानुषेभ्यः । ऊर्द्ध्वंज्जिगातु भेषजम् । शन्नो अस्तु द्विपदे । शञ्चतुष्पदे । ॐ *शान्तिः शान्तिः शान्तिः ॥*

ॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐ

॥ महान्यास प्रारम्बः ॥

ॐ अथातः पञ्चाङ्गरुद्राणां (*पञ्चाक्षर* * *महामन्त्र सम्मिलतु*) न्यासपूर्वकं जप-*होम*-अर्चना-*अभिषेक* विधिं व्याख्यास्यामः । ॐकार मन्त्रसंयुक्तं नित्यं ध्यायन्ति योगिनः । कामदं मोक्षदं तस्मै नकाराय नामो नमः । ॐ भूर्भुवस्सुवः ॥

 



ॐ नं नमस्ते रुद्र मन्यव उतो त इषवे नमः।
नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ॥
या त इषुः शिवतमा शिवं बभूव ते धनुः ।
शिवा शरव्या या तव तया नो रुद्र मृडय ॥
कं खं गं घं ङं । यरलवशषसहोम् ।

ॐ नमो भगवते रुद्राय ।

ॐ ह्रीं नमश्शिवाया = * (Chant only after getting Panchaakshara manthra upadhesham from Guru.)

नं ॐ पूर्वाङ्ग रुद्राय नमः ॥
महादेवं महात्मानं महापातकनाशनम्। महापापहरं वन्दे मकाराय नामो नमः॥ ॐ भूर्भुवस्सुवः॥
ॐ मं निधनपतये नमः। निधनपतान्तिकाय नमः।
ऊर्ध्वाय नमः । ऊर्ध्वलिङ्गाय नमः ।
हिरण्याय नमः । हिरण्यलिङ्गाय नमः ।




महान्यासम्



सुवर्णाय नमः । सुवर्णलिङ्गाय नमः ।
दिव्याय नमः । दिव्यलिङ्गाय नमः ।
भवाय नमः । भवलिङ्गाय नमः ।
शर्वाय नमः । शर्वलिङ्गाय नमः ।
शिवाय नमः । शिवलिङ्गाय नमः ।
ज्वलाय नमः । ज्वललिङ्गाय नमः ।
आत्माय नमः । आत्मलिङ्गाय नमः ।
परमाय नमः । परमलिङ्गाय नमः ।
एतत्सोमस्य सूर्यस्य सर्वलिङ्गँ स्थापयति
पाणिमन्त्रं पवित्रम् । ॐ चं छं जं झं ञं ।
ॐ नमो भगवते रुद्राय । * । मं ॐ
दक्षिणाङ्गरुद्राय नमः॥ शिवं शान्तं जगन्नाथं
लोकानुग्रहकारणम् । शिवमेकं परं वन्दे
शिकाराय नमो नमः ॥ ॐ भूर्भुवस्सुवः॥




महान्यासम्



ॐ शिं अपैतु मृत्युरमृतन्न आगन्वैवस्वतो नो

अभयं कृणोतु । पर्णं वनस्पतेरिवाभि-नश्शीयताꣳ

रयिस्स चतान्नः शचीपतिः ।

ॐ टं ठं डं ढं णं। ॐ नमो भगवते रुद्राय।

*। शिं ॐ *पश्चिमाङ्ग रुद्राय नमः ॥*

वाहनं वृषभो यस्य वासुकिः कण्ठभूषणम् ।

वामे शक्तिधरं वन्दे वकाराय नमो नमः ॥

यो रुद्रो अग्नौ यो अप्सु य ओषदीषु यो रुद्रो

विश्वा भुवनाविवेश तस्मै रुद्राय नमो अस्तु ॥

तं थं दं धं नं । यरलवशषसहोम् ।

*ॐ नमो भगवते रुद्राय । * ।*

उत्तराङ्ग रुद्राय नमः ॥

प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः ।






तेनान्नेनाप्यायस्व ॥

नमो रुद्राय विष्णवे मृत्युर्मे पाहि ॥

पं फं बं भं मं । यरलवशषसहोम् ।

*ॐ नमो भगवते रुद्राय । * ।*

उर्ध्वाङ्ग रुद्राय नमः ॥

॥ इति पञ्चमुखन्यासम् ॥

तत्पुरुषाय विद्महे महादेवाय धीमहि ।

तन्नो रुद्रः प्रचोदयात् ॥

संवर्ताग्नि-तटित्प्रदीप्त-कनकप्रस्पर्धि-तेजोमयं *(रुणं)*

गम्भीरध्वनि-सामवेदजनकं ताम्राधरं सुन्द्रम् ।

अर्धेन्दुद्युति-लोल-पिङ्गल जटा भार-प्रबोद्धोतकं ।

वन्दे सिद्धसुरासुरेन्द्रनमितं पूर्वं मुखं शूलिनः ॥

*ॐ नमो भगवते रुद्राय । * ।*

पूर्वाङ्ग मुखाय नमः ॥

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः ।

सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥

कालाभ्र-भ्रमराञ्जन-द्युतिनिभं व्यावृत्तपिङ्गेक्षणं

कर्णोद्भासित-भोगिमस्तकमणिं प्रोद्भिन्नदंष्ट्राङ्कुरम् ।

सर्पप्रोतकपाल-शुक्तिशकल-व्याकीर्ण-संचारगं *ताशेखरं*

वद्रे दक्षिणमीश्वरस्य कुटिलभ्रूभङ्गरौद्रं मुखम् ॥

(वदनं चाथर्वनादोदयम् ॥)

*ॐ नमो भगवते रुद्राय । * ।*

दक्षिणाङ्ग मुखाय नमः ॥

सद्योजातं प्रपद्यामि सद्यो जाताय वै नमो नमः ।

भवे भवे नाति भवे भवस्व माम् । भवोद्भवाय नमः ॥

प्रालेयाचल-चन्द्रकुन्द-धवलं गोक्षीरफेनप्रभं

भस्माभ्यक्तमनङ्गदेहदहन-ज्वालावलीलोचनम् ।

(विष्णुब्रह्ममरुद्गणार्चितपदं च चर्ग्वेदनादोदयं)

ब्रह्मेन्द्रादिमरुद्गणैस्स्तुतिपरैरभ्यर्चितं योगिभिः
वद्देऽहं सकलं कलङ्करहितं स्थाणोर्मुखं पश्चिमम् ॥

*ॐ नमो भगवते रुद्राय । * ।*

पश्चिमाङ्ग मुखाय नमः ॥

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो
रुद्राय नमः कालाय नमः कलविकरणाय नमो
बलविकरणाय नमो बलाय नमो बलप्रमथनाय
नमस्सर्व-भूतदमनाय नमो मनोन्मनाय नमः ॥

गौरं कुङ्कुम पङ्किलं सुतिलकं व्यापाण्डुगण्डस्थलं
भ्रूविक्षेप-कटाक्षवीक्षणलसत्संसक्तकर्णोत्पलम् ।
स्निग्धं बिम्बफलाधरं प्रहसितं नीलालकालङ्कृतं
वद्दे पूर्णशशाङ्कमण्ढलनिभं *(याजुष-वेदघोषजनकं)*
वक्रं हरस्योत्तरम् ॥

*ॐ नमो भगवते रुद्राय । * । उत्तराङ्ग मुखाय*
नमः ॥ ईशानस्सर्वविद्यानामीश्वरः सर्व भूतानां




महान्यासम्



ब्रह्माधिपतिर्ब्रह्मणोधिपति-र्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥ व्यक्ताव्यक्त गुणेतरं सुविमलं (निरूपितं च परमं) षट्त्रिंशतत्त्वात्मकं तस्मादुत्तर-तत्वमक्षरमिति ध्येयं सदा योगिभिः । ॐकारादि-समस्तमन्त्रजनकं सूक्ष्मातिसूक्ष्मं परं । वद्रे तामसवर्जितं शान्तं पञ्चम-मीश्वरस्य वदनं खव्यापि तेजोमयम् ॥ *ॐ नमो भगवते रुद्राय*

*। * । उध्वाङ्ग मुखाय नमः ॥*

महान्यास – मन्त्रपाठ – प्रारम्भः ॥

॥ केशादि पादान्त न्यासम् ॥

या ते रुद्र शिवातनूरघोरापाप-काशिनी ।

तया न स्तनुवा शन्तमया गिरिशन्ताभिचाकशीहि ॥

। शिखायै नमः ॥ (Centre of the head and the hair there.)

अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि ।

तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि ॥

* । *शिरसे नमः* ॥ **(Head)**

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् ।
तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि ॥

* । *ललाटाय नमः* ॥ **(Forehead)**

हꣳसश्शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथि-
र्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा
ऋतजा अद्रिजा ऋतं बृहत् ॥

* । *भ्रुवोर्मध्याय नमः* ॥ **(Space between eyebrows).**

त्र्यम्बकय्यँजामहे सुगन्धिं पुष्टिवर्द्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥

* । *नेत्राभ्यां नमः* ॥ **(Eyes)**

नमस्स्रुत्याय च पत्थ्याय च नमः काट्याय

च नीप्याय च । नमस्सूद्याय च सरस्याय च

नमो नाद्याय च वैशन्ताय च ॥

* । कर्णाभ्यां नमः ॥ (Two ears)

मा नस्तोके तनये मा न आयुषि मा नो गोषु

मा नो अश्वेषु रीरिषः । वीरान्मानो रुद्र

भामितो वधीर्हविष्मन्तो नमसा विधेम ते ॥

* । नासिकाभ्यां नमः ॥ (Nose)

अवतत्य धनुस्त्वꣳ सहस्राक्ष शतेषुधे ।

निशीर्य शल्यानां मुखाऽशिवो नः सुमना भव ॥

* । मुखाय नमः ॥ (Face)

नीलग्रीवाश्शितिकण्ठाश्शर्वा अधः क्षमाचराः ।

तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि ।

* । कण्ठाय नमः ॥ (Neck)

नीलग्रीवाश्शितिकण्ठा दिवꣳ रुद्रा उपाश्रिताः ।

तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि ।

* । उपकण्ठाय नमः ॥ *(Back side of neck)*

नमस्ते अस्त्वायुधायानातताय धृष्णवे ।
उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ॥

* । बाहुभ्यां नमः ॥ *(Shoulders)*

या ते हेति-र्मीढुष्टम हस्ते बभूव ते धनुः ।
तयाऽस्मान् । विश्वतस्त्व मयक्ष्मया परिब्भुज ॥

* । उपबाहुभ्यां नमः ॥ *(Space between wrist and Shoulders)*

परिणो रुद्रस्य हेतिर्वृणक्तु परित्वेषस्य
दुर्मति-रघायोः । अवस्थिरा मघवद्भ्यस्तनुश्व
मीढ्वस्तोकाय तनयाय मृडय ।

* । मणिबन्धाभ्यां नमः ॥ *(Wrist)*

ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ।

 

महान्यासम्



* । *हस्ताभ्यां नमः* ॥ **(Hands)**

सद्यो जातं प्रपद्यामि सद्यो जाताय वै नमो नमः ।
भवे भवे नातिभवे भवस्व माम् ।
भवोद्भवाय नमः ॥ ॐ * ॥ *अङ्गुष्ठाभ्यां नमः* ॥
(Thumbs)

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो
रुद्राय नमः कालाय नमः कलविकरणाय नमो
बलविकरणाय नमो बलाय नमो बलप्रमथनाय
नमस्सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥

* । *तर्जनीभ्यां नमः* ॥ ***(Index Fingers)***

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः ।
सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥

* । *मध्यमाभ्यां नमः* ॥***(Middle Fingers)*** तत्पुरुषाय
विद्महे महादेवाय धीमहि । तन्नो रुद्रः

॥

प्रचोदयात् ॥ * / *अनामिकाभ्यां नमः॥* (Ring Fingers)

ईशानस्सर्वविद्यानामीश्वरः सर्वभूतानां

ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु

सदाशिवोम् ॥ * // *कनिष्ठिकाभ्यां नमः* ॥

(Little Fingers)

नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय

हिरण्यपतयेऽम्बिकापतय उमापतये पशुपतये

नमो नमः ॥ *करतलकरपृष्ठाभ्यां नमः* ॥

(rub the inner and outer palms)

नमो वः किरिकेभ्यो देवाना॒ हृदयेभ्यः ।

* / *हृदयाय नमः* ॥ (Heart)

ये वृक्षेषु सस्पिञ्जरा नीलग्रीवा विलोहिताः ।

तेषा॒ सहस्रयोजनेऽवधन्वानि तन्मसि ॥

* / *उदराय नमः* ॥ (Lips)

नमश्शम्भवे च मयोभवे च । * /

कक्षाभ्यां नमः । (Arm Pit)

नमो गणेभ्यो गणपतिभ्यश्च वो नमः ।

* *। पृष्ठाय नमः ॥* (Back side)

नमस्तक्षभ्यो रथकारेभ्यश्च वो नमः । * ।

कक्षाभ्यां नमः ॥ (Arm Pit)

नमो हिरण्यबाहवे

सेनान्ये दिशाञ्च पतये नमः । * *।*

॥ पार्श्वाभ्यां नमः ॥ (Side of the Ribs)

विज्यं धनुः कपर्दिनो विशल्यो बाणवाँ उत ।

अनेशन्नस्येषव आभुरस्य निषङ्गथिः ।

* *। जठराय नमः ॥* (Inner Stomach)

हिरण्यगर्भस्समवर्तताग्रे भूतस्य जातः पतिरेक

आसीत् । सदाधार पृथिवीन्द्यामुतेमां कस्मै

देवाय हविषा विधेम ॥ * *। नाभ्यै नमः ॥*

(Navel)

मीढुष्टम शिवतम शिवोनस्सुमना भव ।
परमे वृक्ष आयुधन्निधाय कृत्तिं वसान
आचर पिनाकं बिभ्रदागहि ॥ * / कट्यै नमः //
(Hip)
ये भूतानामधिपतयो विशिखासः कपर्दिनः ।
तेषाꣳसहस्रयोजनेऽव धन्वानि तन्मसि ।
* / गुह्याय नमः // (Private Parts)
ये अन्नेषु विविद्ध्यन्ति पात्रेषु पिबतो जनान् ।
तेषाꣳसहस्रयोजनेऽवधन्वानि तन्मसि ।
* / अण्डाभ्यां नमः // (Testicles)
स शिरा जातवेदाः अक्षरं परमं पदम् ।
वेदानाꣳशिरसि माताऽऽयुष्मन्तं करोतु माम् ॥
* / अपानाय नमः // (Anus)
मानो महान्तमुत मा नो अर्भकं
मा न उक्षन्त-मुत मा न उक्षितम् ।

मा नो वधीः पितरं मोत मातरं

प्रिया मा नस्तनुवो रुद्र रीरिषः ॥ * /

ऊरुभ्यां नमः ॥ ***(Thighs)***

एष ते रुद्रभागस्तञ्जुषस्व तेनावसेन परो

मूजवतोऽतीह्यवततधन्वा पिनाकहस्तः कृत्तिवासाः ॥

* / *जानुभ्यां नमः ॥* ***(Knees)***

सꣳसृष्टजित्सोमपा बाहुशर्द्ध्यूर्द्ध्वधन्वा

प्रतिहिता-भिरस्ता । बृहस्पते परिदीया

रथेन रक्षोहामित्राꣳ अपबाधमानः ॥

* / *जङ्घाभ्यां नमः ॥* ***(Ankles)***

विश्वं भूतं भुवनञ्चित्रं बहुधा जातञ्जायमानञ्च यत्।

सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु ॥

* / *गुल्फाभ्यां नमः ॥* ***(Calf Muscles)***

ये पथां पथिरक्षय ऐलबृदा यव्युधः ॥
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ।

* । *पादाभ्यां नमः ॥* ***(Feet)***

अद्ध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहीꣳश्च सर्वाञ्जम्भयन्थ्सर्वाश्च यातुधान्यः ॥

* । *कवचाय हुम्* ॥ ***(Right hand to touch left shoulder and left hand to touch right shoulder)***

नमो बिल्मिने च कवचिने च नमः श्रुताय च
श्रुतसेनाय च ॥ * । *उपकवचाय हुम् ॥* ***(?)***

नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
अथो ये अस्य सत्वानोऽहन्तेभ्योऽकरन्नमः ॥

* । *तृतीय नेत्रत्रयाय वौषट् ॥* ***(Right index finger to close right eye, middle finger to touch the third eye in the fore-head, ring finger to close the left eye at the same time.)***

प्रमुञ्च धन्वनस्त्वमुभयोरार्त्नियोर्ज्याम् ।
याश्च ते हस्त इषवः परा ता भगवो वप ॥

* / अस्त्राय फट् // (Tapping the left hand inner palm with the index finger and middle finger making a nose by rubbing.)

य एतावन्तश्च भूयाꣳसश्च दिशो रुद्रा वितस्थिरे ।
तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि ॥

* / इति दिग्बन्धः // ?

ॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐ

// दशाङ्ग न्यासम् //

ॐ नमो भगवते रुद्रायेति नमस्कारान् न्यसेत् //

* / ॐ मूर्ध्ने नमः । * / नं नासिकायै नमः ।
* / मों ललाटाय नमः । * / भं मुखाय नमः ।
* / गं कण्ठाय नमः । * / वं हृदयाय नमः ।
* / तें दक्षिण हस्ताय नमः । * / रुं वामहस्ताय नमः । * / द्रां नाभ्यै नमः । * / यं पादाभ्यां नमः ॥

// पादादिमूर्धान्त पञ्चाङ्ग न्यासम् //




महान्यासम्



सद्योजातं प्रपद्यामि सद्यो जाताय वै नमो नमः।

भवे भवे नाति भवे भवस्व माम् ।

भवोद्भवाय नमः ॥ * ॥ *पादाभ्यां नमः* ॥

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो

रुद्राय नमः कालाय नमः कलविकरणाय नमो

बलविकरणाय नमो बलाय नमो भलप्रमथनाय

नमस्सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥

* । *ऊरु (मध्यमा)भ्यां नमः* ॥

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः ।

सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥

* । *हृदयाय नमः* ॥

तत्पुरुषाय विद्महे महादेवाय धीमहि ।

तन्नो रुद्रः प्रचोदयात् ॥ * ॥ *मुखाय नमः* ॥






ईशानस्सर्वविद्यानामीश्वरः सर्वभूतानां

ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे

अस्तु सदाशिवोम् ॥ * ॥ मूर्ध्ने नमः ॥

ॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐ

॥ हंसगायत्री ॥

अस्य श्री हंसगायत्री स्तोत्र महामन्त्रस्य ।
अव्यक्त परब्रह्म ऋषिः। अव्यक्त गायत्री (अनुष्टुप्)
छद्नः । परमहंसो देवता ॥ हं-सां-बीजम् ॥
हं-सीं शक्तिः ॥ हं-सूं कीलकम् ॥
परमहंस प्रसाद सिद्ध्यर्थे जपे विनियोगः ॥

हं- सां - अङ्गुष्ठाभ्यां नमः ॥ हं-सीं तर्जनीभ्यां
नमः ॥ हं-सूं - मध्यमाभ्यां नमः ॥
हं-सैं अनामिकाभ्यां नमः ॥

हं-सौं - कनिष्ठिकाभ्यां नमः ॥

हं-सः - करतलकरपृष्ठाभ्यां नमः ॥

हं-सां - हृदयाय नमः॥ हं-सीं - शिरसे स्वाहा॥

हं-सूं शिखायै वषट् ॥ हं-सैं -

कवचाय हुम् ॥ हं-सौं नेत्रत्रयाय वौषट् ॥

हं-सः - अस्त्राय फट् ॥

भूर्भुवस्सुवरोमिति दिग्बन्धः ॥ ***॥ ध्यानम् ॥***

गमागमस्थं गमनादिशून्यं चिध्द्रूपदीपं तिमिरापहारम् ।

पश्यामि तं सर्वजनान्तरस्थं नमामि हंसं परमात्मरूपम् ॥

देहो देवालयः प्रोक्तो जीवो देवस्सनातनः ।

त्यजेदज्ञाननिर्माल्यं सोऽहं भावेन पूजयेत् ॥

हंसो हंसः परमहंसः । हंसस्सोऽहं सोहं हंसः ॥

हंस हंसाय विद्महे परमहंसाय धीमहि ।

तन्नो हंसः प्रचोदयात् ॥ ***(chant 3 times)***

हंस हंसेति यो ब्रूयाद्धंसो नाम सदाशिवः ।
एवं न्यासविधिं कृत्वा ततस्संपुटमारभेत् ॥ ॐ

ॐ श्री गुरुभ्यो नमः । हरिः ॐ ॥

॥ दिक् संपुटन्यासम् ॥ ॐ भूर्भुवस्सुवरोम् ॥

ॐ लम् । त्रातारमिन्द्रमवितारमिन्द्रँ हवेहवे सुहवँ शूरमिन्द्रम् । हुवेनु शक्रं पुरुहूतमिन्द्रँ स्वस्ति नो मघवातात्विन्द्रः ।

ॐ लं भूर्भुवस्सुवः । पूर्वदिग्भागे इन्द्राय वज्रहस्ताय देवा(सुरा) धिपतये ऐरावतवाहनाय साङ्गाय सायुधाय सशक्तये-सपरिवाराय सर्वालङ्कार भूषिताय उमामहेश्वर पार्षदाय नमः॥ * ।

पूर्वदिग्भागे ललाटस्थाने लं इन्द्राय नमः ।
पूर्वदिग्भागे इन्द्रस्सुप्रीतस्सुप्रसन्नो वरदो भवतु ।






इन्द्रस्सम्रक्षतु // ५-१ //

ॐ भूर्भुवस्सुवरोम् // ॐ रं - त्वन्नो अग्ने वरुणस्य विद्वाद्देवस्य हेडोऽवयासिसीष्ठाः । यजिष्ठो वह्नितम श्शोशुचानो विश्वात्वेषाꣳसि प्रमुमुग्ध्यस्मत् ॥ रं भूर्भुवस्सुवः आग्नेयदिग्भागे अग्नये शक्तिहस्ताय तेजोऽधिपतये अजवाहनाय साङ्गाय सायुधाय सशक्तये-सपरिवाराय सर्वालङ्कारभूषिताय उमामहेश्वर पार्षदाय नमः

* / रं अग्नये नमः । आग्नेयदिग्भागे

नेत्रस्थाने अग्निः सुप्रीतो *सुप्रसन्नो* वरदो भवतु

अग्निस्सम्रक्षतु // ५ - २ //

ॐ भूर्भुवस्सुवरोम् // हं - सुगन्नः पन्थामभयङ्कृणोतु । यस्मिन्नक्षत्रे यम एति राजा ॥ यस्मिन्नेनमभ्यषिञ्चन्ति देवाः । तदस्य चित्रꣳ

हविषा यजाम ॥ हं भूर्भुवस्सुवः

दक्षिणदिग्भागे यमाय दण्डहस्ताय धर्माधिपतये

महिषवाहनाय साङ्गाय सायुधाय सशक्तये-

सपरिवाराय सर्वालङ्कारभूषिताय उमामहेश्वर

पार्षदाय नमः । * / हं यमाय नमः ।

दक्षिणदिग्भागे कर्णस्थाने यमस्सुप्रीतस्सुप्रसन्नो

वरदो भवतु । *यमस्सम्रक्षतु* ॥५-३॥

ॐ भूर्भुवस्सुवरोम् ॥ षं ॥ असुन्वन्त

मयजमानमिच्छस्तेनस्येत्यान्तस्करस्यान्वेषि ।

अन्यमस्मदिच्छ सा त इत्या नमो देवि

निरृते तुभ्यमस्तु ॥ षं भूर्भुवस्सुवः

निरृतदिग्भागे निरृतये खड्गहस्ताय

रक्षोधिपतये नरवाहनाय साङ्गाय सायुधाय






सशक्तये-सपरिवाराय सर्वालङ्कारभूषिताय उमामहेश्वर पार्षदाय नमः । * / षं निऋऋतये नमः। नैर्ऋतदिग्भागे मुखस्थाने निऋऋतिः स्सुप्रीतस्सुप्रसन्नो वरदो भवतु ।

निऋऋतिस्सम्रक्षतु ॥ ५ - ४ ॥

ॐ भूर्भुवस्सुवरोम् ॥ वं / तत्त्वायामि ब्रह्मणा वद्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणेह वोदृध्युरुशꣳसमान आयुः प्रमोषीः ॥ वं भूर्भुवस्सुवः पश्चिमदिग्भागे वरुणाय पाशहस्ताय जलाधिपतये मकरवाहनाय साङ्गाय सायुधाय सशक्तये-सपरिवाराय सर्वालङ्कारभूषिताय उमामहेश्वर पार्षदाय नमः । * / वं वरुणाय नमः। पश्चिमदिग्भागे

बाहुवोस्थाने वरुणस्सुप्रीतोस्सुप्रसन्नो वरदो भवतु । *वरुणस्सम्प्रक्षतु* // ५-५ //

ॐ *भूर्भुवस्सुवरोम्* // यं / आ नो निँयुद्भिँश्शतिनीँभिरद्ध्वरम् । सहस्त्रिणीँभि-रुपयाहि यज्ञम् । वायो अस्मिन् हविषि मादयस्व । यूयं पात स्वस्तिभिस्सदानः ॥

यं भूर्भुवस्सुवः वायव्यदिग्भागे वायवे साङ्कुशद्ध्वजहस्ताय प्राणाधिपतये मृगवाहनाय साङ्गाय सायुधाय सशक्तये-सपरिवाराय सर्वालङ्कारभूषिताय उमामहेश्वर पार्षदाय नमः ।

* / यं वायवे नमः । वायव्यदिग्भागे नासिकस्थाने वायुस्सुप्रीतस्सुप्रसन्नो वरदो भवतु । *वायुस्सम्प्रक्षतु* ॥ // ५ - ६ //






ॐ भूर्भुवस्सुवरोम् ॥ सं ।

वयꣳ सोमव्रते तव । मनस्तनूषु बिभ्रतः ।
प्रजावन्तो अशीमहि ॥ सं भूर्भुवस्सुवः
उत्तरदिग्भागे सोमाय अमृतकलशहस्ताय
नक्षत्राधिपतये अश्ववाहनाय साङ्गाय सायुधाय
सशक्तये-सपरिवाराय सर्वालङ्कारभूषिताय
उमामहेश्वर पार्षदाय नमः । * ।

सं सोमाय नमः। उत्तरदिग्भागे हृदयस्थाने
सोमस्सुप्रीतस्सुप्रसन्नो वरदो भवतु ।
सोमस्सम्रक्षतु ॥ ५ - ७ ॥ ॐ भूर्भुवस्सुवरोम् ॥

शं । तमीशानञ्जगत स्तस्थुषस्पतिम् ।
धियञ्जिन्वमवसे हूमहे वयम् । पूषा नो यथा
वेदसामसद्वृधे रक्षिता पायुरदब्ध स्वस्तये ॥

शं भूर्भुवस्सुवः ईशानदिग्भागे ईशानाय त्रिशूलहस्ताय भूताधिपतये वृषभवाहनाय साङ्गाय सायुधाय सशक्तये-सपरिवाराय सर्वालङ्कारभूषिताय उमामहेश्वर पार्षदाय नमः ।

* / शं ईशानाय नमः। ईशानदिग्भागे नाभिस्थाने ईशानस्सुप्रीतस्सुप्रसन्नो वरदो भवतु । *ईशस्सम्रक्षतु* ॥ *॥ ५ - ८ ॥*

ॐ *भूर्भुवस्सुवरोम्* ॥ खं / अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः । यश्शंसते स्तुवते धायिपज्र इन्द्रज्येष्ठा अस्माँ अवन्तु देवाः ॥ खं भूर्भुवस्सुवः ऊर्ध्वदिग्भागे ब्रह्मणे पद्महस्ताय प्रजाधिपतये हंसवाहनाय साङ्गाय सायुधाय सशक्तये-

सपरिवाराय सर्वालङ्कारभूषिताय उमामहेश्वर पार्षदाय नमः । */ खं ब्रह्मणे नमः।

ऊर्द्ध्वदिग्भागे मूर्द्धस्थाने ब्रह्मास्सुप्रीतस्सुप्रसन्नो वरदो भवतु। *ब्रह्मस्सम्रक्षतु* ॥ // ५ - ९ //

ॐ *भूर्भुवस्सुवरोम्* // ह्रीं । स्योना पृथिवि भवा नृक्षरा निवेशनी । यच्छा नश्शर्म सप्रथाः ॥

ह्रीं भूर्भुवस्सुवः अधोदिग्भागे विष्णवे चक्रहस्ताय लोकाधिपतये गरुडवाहनाय साङ्गाय सायुधाय सशक्तये-सपरिवाराय सर्वालङ्कारभूषिताय उमामहेश्वर पार्षदाय नमः । */ ह्रीं विष्णवे नमः। अधोदिग्भागे पादस्थाने विष्णुस्सुप्रीतस्सुप्रसन्नो वरदो भवतु ।

विष्णुस्सम्रक्षतु // ५ - १० //

ॐ भूर्भुवस्सुवरोम् ॥ षोडशाङ्ग रौद्रीकरणम् ॥

॥ ६ ॥ ॐ भूर्भुवस्सुवः । ॐ अं ।
नमश्शंभवे च मयोभवे च नमश्शङ्कराय च
मयस्कराय च नमश्शिवाय च शिवतराय च
॥ विभूरसि प्रवाहणो रौद्रेणानीकेन पाहि
माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥
अं ॐ भूर्भुवस्सुवरों । * ।
शिखास्थाने रुद्राय नमः ॥ ॥ ६ - १ ॥

ॐ भूर्भुवस्सुवः । ॐ आं । नमश्शंभवे च
मयोभवे च नमश्शङ्कराय च मयस्कराय च
नमश्शिवाय च शिवतराय च ॥
वन्हिरसि हव्यवाहनो रौद्रेणानीकेन
पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥

आं ॐ भूर्भुवस्सुवरों । * ।

शिरास्थाने रुद्राय नमः ॥ ॥ ६ - २ ॥

ॐ भूर्भुवस्सुवः । ॐ इं । नमश्शंभवे च

मयोभवे च नमश्शङ्कराय च मयस्कराय च

नमश्शिवाय च शिवतराय च ॥

श्चात्रोसि प्रचेताः रौद्रेणानीकेन

पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥

इं ॐ भूर्भुवस्सुवरों । * । मूर्धस्थाने रुद्राय

नमः ॥ ॥ ६ - ३ ॥

ॐ भूर्भुवस्सुवः । ॐ ईं । नमश्शंभवे च

मयोभवे च नमश्शङ्कराय च मयस्कराय च

नमश्शिवाय च शिवतराय च ॥

तुथीसि विश्ववेदा रौद्रेणानीकेन

पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥

ईं ॐ भूर्भुवस्सुवरों । * ।

ललाटस्थाने रुद्राय नमः ॥ // ६ - ४ //

ॐ भूर्भुवस्सुवः । ॐ उं । नमश्शंभवे च
मयोभवे च नमश्शङ्कराय च मयस्कराय च
नमश्शिवाय च शिवतराय च ॥
उशिगसि कवी रौद्रेणानीकेन पाहि माऽग्ने
पिपृहि मा मा मा हिꣳसीः ॥

उं ॐ भूर्भुवस्सुवरों । * ।

भ्रूस्थाने रुद्राय नमः ॥ // ६ - ५ //

ॐ भूर्भुवस्सुवः । ॐ ऊं । नमश्शंभवे च
मयोभवे च नमश्शङ्कराय च मयस्कराय च
नमश्शिवाय च शिवतराय च ॥ अङ्गारिरसि

बम्भारी रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा
मा मा हिꣳसीः ॥ ऊं ॐ भूर्भुवस्सुवरों * ।
मुखस्थाने रुद्राय नमः ॥ // ६ - ६ //

ॐ भूर्भुवस्सुवः । ॐ ऋं । नमश्शंभवे च
मयोभवे च नमश्शङ्कराय च मयस्कराय च
नमश्शिवाय च शिवतराय च ॥
अवस्युरसि दुवस्वान् रौद्रेणानीकेन पाहि
माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥
ऋं ॐ भूर्भुवस्सुवरों * । कण्ठस्थाने रुद्राय नमः
// ६ – ७ //

ॐ भूर्भुवस्सुवः । ॐ ॠं । नमश्शंभवे च
मयोभवे च नमश्शङ्कराय च मयस्कराय च
नमश्शिवाय च शिवतराय च ॥

शुन्ध्यूरसि मार्जालीयो रौद्रेणानीकेन
पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥
ऋृं ॐ भूर्भुवस्सुवरों * / बाहुस्थाने रुद्राय नमः

॥ ६ - ८ ॥

ॐ भूर्भुवस्सुवः / ॐ ऌं / नमश्शंभवे च
मयोभवे च नमश्शङ्कराय च मयस्कराय च
नमश्शिवाय च शिवतराय च ॥
सम्राडसि कृशानू रौद्रेणानीकेन पाहि
माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥
ऌं ॐ भूर्भुवस्सुवरों * / ऊरुस्थाने रुद्राय नमः

॥ ॥६-९॥

ॐ भूर्भुवस्सुवः / ॐ ॡं / नमश्शंभवे च
मयोभवे च नमश्शङ्कराय च मयस्कराय च

नमश्शिवाय च शिवतराय च ॥

परिषद्योसि पवमानो रौद्रेणानीकेन

पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥

ॡं ॐ भूर्भुवस्सुवरों * / हृदयस्थाने रुद्राय नमः ॥

॥६ – १० ॥

ॐ भूर्भुवस्सुवः / ॐ एं / नमश्शंभवे च

मयोभवे च नमश्शङ्कराय च मयस्कराय च

नमश्शिवाय च शिवतराय च ॥

प्रतक्वासि नभस्वान् रौद्रेणानीकेन

पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥

एं ॐ भूर्भुवस्सुवरों * /

नाभिस्थाने रुद्राय नमः ॥ ॥ ६ - ११ ॥

ॐ भूर्भुवस्सुवः / ॐ ऐं / नमश्शंभवे च

 



मयोभवे च नमश्शङ्कराय च मयस्कराय च

नमश्शिवाय च शिवतराय च ॥

असंमृष्टोऽसि हव्यसूदो रौद्रेणानीकेन

पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥

ऐं ॐ भूर्भुवस्सुवरों * ।

कटिस्थाने रुद्राय नमः ॥ //६ - १२ //

ॐ भूर्भुवस्सुवः । ॐ ओं । नमश्शंभवे च

मयोभवे च नमश्शङ्कराय च मयस्कराय च

नमश्शिवाय च शिवतराय च ॥

ऋतधामासि सुवर्ज्योति रौद्रेणानीकेन

पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥

ओं ॐ भूर्भुवस्सुवरों * ।

ऊरुस्थाने रुद्राय नमः ॥ // ६ - १३ //

ॐ भूर्भुवस्सुवः । ॐ औं । नमश्शंभवे च
मयोभवे च नमश्शङ्कराय च मयस्कराय च
नमश्शिवाय च शिवतराय च ॥
ब्रह्मज्योतिरसि सुवर्द्धामा रौद्रेणानीकेन
पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥
औं ॐ भूर्भुवस्सुवरों * ।
जानुस्थाने रुद्राय नमः ॥ ॥ ६ - १४ ॥

ॐ भूर्भुवस्सुवः । ॐ अं । नमश्शंभवे च
मयोभवे च नमश्शङ्कराय च मयस्कराय च
नमश्शिवाय च शिवतराय च ॥
अजोऽस्येकपात् रौद्रेणानीकेन
पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥
अं ॐ भूर्भुवस्सुवरों * ।

जङ्घास्थाने रुद्राय नमः ॥ ६ - १५ ॥

ॐ भूर्भुवस्सुवः । ॐ अः । नमश्शंभवे च मयोभवे च नमश्शङ्कराय च मयस्कराय च नमश्शिवाय च शिवतराय च ॥ अहिरसि बुद्ध्नियो रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥ अः ॐ भूर्भुवस्सुवरों * । पादस्थाने रुद्राय नमः ॥ ॥६ - १६॥

त्वगस्थिगतै--स्सर्व--पापैः प्रमुच्यते ।
सर्वभूतेश्वपराजितो भवति । ततो यक्ष गन्धर्व भूत प्रेत पिशाच ब्रह्मराक्षस यक्ष यमदूत शाकिनी डाकिनी सर्प श्वापद वृश्चिक तस्करा-ज्वरा द्युपद्रव जोपघाताः ।
सर्वे ज्वलन्तं पश्यन्तु ।
मां रक्षन्तु । यजमानं सहकुटुम्बं रक्षन्तु ।

ॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐ

गुह्यादि मस्तकान्तं षडङ्ग न्यासम्॥ चतुर्थो न्यासः

मनो ज्योतिर्जुषता-माज्यं विच्छिन्नय्ँयज्ञꣳ

समिमद्दधातु । या इष्टा उषसो निम्रुचश्च

तास्सद्दधामि हविषा घृतेन । * गुह्याय नमः ।

अबोद्ध्यग्नि स्समिधा जनानां

प्रतिधेनुमिवायतीमुषासम् । यह्वा इव

प्रवयामुज्जिहानाः प्रभानवस्सिस्रेते नाकमच्छ ।

* नाभ्यै नमः । अग्निर्मूर्द्धा दिवः

ककुत्पतिः पृथिव्या अयम् । अपाꣳरेताꣳसि

जिन्वति ॥ * हृदयायै नमः । मूर्द्धानं

दिवो अरतिं पृथिव्या वैश्वानरमृताय जातमग्निम् ।

कवि॑सम्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्त देवाः ॥ * कण्ठाय नमः ।

मर्माणि ते वर्मभिश्छादयामि सोमस्त्वा राजाऽमृतेनाभिवस्ताम् । उरोर्वरीयो वरिवस्ते अस्तु जयन्तन्तवामनु मदन्तु देवाः ।

* मुखाय नमः ।

जातवेदा यदिवा पावकोऽसि । वैश्वानरो यदि वा वैद्युतोऽसि । शं प्रजाभ्यो यजमानाय लोकम् । ऊर्जं पुष्टिद्ददद्भ्यावव‍ृथ्स्व ॥ *शिरसे नमः ।*

ॐॐॐ

(ब्रह्मात्मन्नित्यनुवाकः) *आत्म रक्षा*

॥ ब्रह्मात्मन्वदसृजत । तदकामयत । समात्मनापद्येयेति । आत्मन्नात्मन्नित्यामन्त्रयत । तस्मै दशम॑हूतः प्रत्यश्रृणोत् ।

स दशहूतोऽभवत् । दशहूतो ह वैनामै षः ।

तं वा एतद्दशहूतꣳसन्तम् ।

दशहोतेत्याचक्षते परोक्षेण ।

परोक्षप्रिया इव हि देवाः ॥

आत्मन्नात्मन्नित्यामन्त्रयत । तस्मै सप्तमꣳहूतः

प्रत्यश्रृणोत् । स सप्तहूतोऽभवत् । सप्तहूतो

हवैनामै षः । तंवाएतꣳ सप्तहूतꣳसन्तम् ।

सप्तहोतेत्याचक्षते परोक्षेण। परोक्षप्रिया इवहि

देवाः ॥ आत्मन्नात्मन्नित्यामन्त्रयत । तस्मै

षष्ठꣳहूतः प्रत्यश्रृणोत् । स षड्दूतोऽभवत् ।

षड्दूतो हवैनामै षः । तंवा एतꣳषड्दूतꣳसन्तम्।

षड्ढोतेत्याचक्षते परोक्षेण। परोक्षप्रियाइव हि देवाः॥

आत्मन्नात्मन्नित्यामन्त्रयत । तस्मै पञ्चमꣳहूतः

प्रत्यश्रृणोत् । स पञ्चहूतोऽभवत् । पञ्चहूतो
हवैनामैषः । तंवा एतं पञ्चहूतꣳसन्तम् ।
पञ्चहोतेत्याचक्षते परोक्षेण । परोक्षप्रिया इवहि देवाः ॥
आत्मन्नात्मन्नित्यामन्त्रयत । तस्मै चतुर्थꣳहूतः
प्रत्यश्रृणोत् । स चतुर्हूतोऽभवत् । चतुर्हूतो
हवैनामैषः । तं वा एतञ्चतुर्हूतꣳसन्तम् ।
चतुर्होतेत्याचक्षते परोक्षेण । परोक्षप्रिया इवहि देवाः ॥
तमब्रवीत् । त्वं वै मे नेदिष्ठꣳहूतः प्रत्यश्रौषीः ।
त्वयैनानाख्यातार इति । तस्मान्नुहैनाꣳश्चतुर्होतार
इत्याचक्षते । तस्माच्छुश्रूषुः पुत्राणाꣳहृद्यतमः ।
नेदिष्ठो हृत्यतमः । नेदिष्ठो ब्रह्मणो भवति ।
य एवँव्वेद । * *। आत्मने नमः ॥*

हृदयाद्यस्त्रान्तं पञ्चाङ्गन्यासः पञ्चमः न्यासः -

॥ शिवसङ्कल्पम् ॥

येनेदं भूतं भुवनं भविष्यत्परिगृहीतममृतेन सर्वम् ।
येन यज्ञस्तायते सप्तहोता तन्मे
मनश्शिवसङ्कल्पमस्तु ॥ येन कर्माणि प्रचरन्ति
धीरा यतो वाचा मनसा चारु यन्ति ।
यथ्सम्मितमनु सँय्यन्ति प्राणिनस्तन्मे
मनश्शिवसङ्कल्पमस्तु ॥ येन कर्माण्यपसो
मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः। यदपूर्वं
यक्ष्ममन्तः प्राजानान्तन्मे मनश्शिवसङ्कल्पमस्तु ॥
यत्प्रज्ञानमुत चेतो धृतिश्च यज्जयोतिरन्तरमृतं
प्रजासु। यस्मान्न ऋते किञ्चन कर्मक्रियते तन्मे
मनश्शिवसङ्कल्पमस्तु ॥ सुषारथिरश्वानिव

यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव। हृत्प्रतिष्ठं
यदजिरं यविष्ठं तन्मे मनश्शिवसङ्कल्पमस्तु ॥
यस्मिन्नृच स्साम यजूꣳषि यस्मिन् प्रतिष्ठा
रथनाभाविवाराः। यस्मिꣳश्चित्तꣳ सर्वमोतं
प्राजानान्तन्मे मनश्शिवसङ्कल्पमस्तु ॥ यदत्र
षष्ठन्त्रिशतꣳसुवीरं यज्ञस्य गुह्यन्नवनावमाय्यम्।
दश पञ्च त्रिꣳशतं यत्परञ्च तन्मे
मनश्शिवसङ्कल्पमस्तु ॥ यज्जाग्रतो
दूरमुदैति दैवं तदुसुप्तस्य तथैवैति ।
दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मे
मनश्शिवसङ्कल्पमस्तु ॥ येनेदं विश्वञ्जगतो बभूव
ये देवापि महतो जातवेदाः। तदेवाग्निस्तमसो
ज्योतिरेकन्तन्मे मनश्शिवसङ्कल्पमस्तु ॥

येन द्यौः पृथिवी चान्तरिक्षञ्च ये पर्वताः प्रदिशो दिशश्च । येनेदञ्जगद्व्याप्तं प्राजानान्तन्मे मनश्शिवसङ्कल्पमस्तु ॥ ये मनो हृदयं ये च देवा ये दिव्या आपो ये सूर्यरश्मिः। ते श्रोत्रे चक्षुषी सञ्चरन्तन्मे मनश्शिवसङ्कल्पमस्तु ॥

अचिन्तयञ्चाप्रमेयञ्च व्यक्ताव्यक्तपरञ्च यत् । सूक्ष्मात्सूक्ष्मतरं ज्ञेयन्तन्मे मनश्शिवसङ्कल्पमस्तु ॥

एका च दश शतञ्च सहस्रञ्चायुतञ्च नियुतञ्च प्रयुतञ्चार्बुदञ्च न्यर्बुदञ्च समुद्रश्च मद्ध्यञ्चान्तश्च पराद्धश्च तन्मे मनश्शिवसङ्कल्पमस्तु ॥

ये पञ्च पञ्चादश शतꣳसहस्र मयुतन्नयर्बुदञ्च । ते अग्निचित्येष्टकास्तꣳ शरीरन्तन्मे मनश्शिवसङ्कल्पमस्तु ॥

वेदाहमेतं पुरुषं महान्तमादित्यवर्णन्तमसः परस्तात् । यस्य योनिं

परिपश्यन्ति धीरास्तन्मे मनश्शिवसङ्कल्पमस्तु ॥

यस्येदन्धीराः पुनन्ति कवयो ब्रह्माणमेतन्त्वा

वृणत इन्दुम् । स्थावरञ्जङ्गमन्द्यौराकाशन्तन्मे

मनश्शिवसङ्कल्पमस्तु ॥ परात्परतरञ्चैव यत्पराच्चैव

यत्परम् । यत्परात्परतो ज्ञेयन्तन्मे

मनश्शिवसङ्कल्पमस्तु ॥ परात्परतरो ब्रह्मा

तत्परात्परतो हरिः । तत्परात्परतोऽधीशस्तन्मे

मनश्शिवसङ्कल्पमस्तु ॥ या वेदादिषु गायत्री

सर्वव्यापी महेश्वरी । ऋग्यजुस्सामाथर्वैश्च तन्मे

मनश्शिवसङ्कल्पमस्तु ॥ यो वै देवं महादेवं

प्रणवं परमेश्वरम् । यस्सर्वे स्वे वेदैश्च तन्मे

मनश्शिवसङ्कल्पमस्तु ॥ प्रयतःप्रणवोङ्कारं प्रणवं

पुरुषोत्तमम् । ओङ्कारं प्रणवात्मानन्तन्मे






मनश्शिवसङ्कल्पमस्तु ॥ योऽसौ सर्वेषु वेदेषु
पठ्यते ह्यजईश्वरः। अकायो निर्गुणो ह्यात्मा
तन्मे मनश्शिवसङ्कल्पमस्तु ॥ गोभिर्जुष्टन्धनेन
ह्यायुषा च बलेन च । प्रजया पशुभिः
पुष्कराक्षन्तन्मे मनश्शिवसङ्कल्पमस्तु ॥
त्र्यम्बकँय्यजामहे सुगन्धिं पुष्टिवर्द्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्तनमे
मनश्शिवसङ्कल्पमस्तु ॥ कैलासशिखरे रम्ये
शङ्करस्य शिवालये । देवातास्तत्र मोदन्ते तन्मे
मनश्शिवसङ्कल्पमस्तु ॥ विश्वतश्चक्षुरुत
विश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात् ।
संबाहुभ्यान्नमति संपतत्रैर्द्यावापृथिवी जनयद्देव
एकस्तन्मे मनश्शिवसङ्कल्पमस्तु ॥

 



चतुरो वेदानधीयीत सर्वशास्त्रमयं विदुः ।
इतिहासपुराणानान्तन्मे मनश्शिवसङ्कल्पमस्तु ॥
मा नो महान्तमुत मा नो अर्भकं मा न
उक्षन्तमुत मा न उक्षितम् । मा नो वधीः
पितरं मोत मातरं प्रिया मा नस्तनुवो
रुद्ररीरिषस्तन्मे मनश्शिवसङ्कल्पमस्तु ॥
मा नस्तोके तनये मा न आयुषि मा नो
गोषु मा नो अश्वेषु रीरिषः । वीरान्मानो
रुद्र भामितो वधीर् हविष्मन्तो नमसा विधेम
ते तन्मे मनश्शिवसङ्कल्पमस्तु ॥
ऋतꣳसत्यं परं ब्रह्मपुरुषङ्कृष्णपिङ्गलम् ।
ऊर्द्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो
नमस्तन्मे मनश्शिवसङ्कल्पमस्तु ॥ कद्रुद्राय
प्रचेतसे मीढुष्टमाय तव्यसे । वोचेम

शन्तमꣳ हृदे । सर्वो ह्येष रुद्रस्तस्मै रुद्राय
नमो अस्तु तन्मे मनश्शिवसङ्कल्पमस्तु ॥
ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो
वेन आवः। स बुद्ध्निया उपमा अस्य
विष्ठास्सतश्च योनिमसतश्च विवस्तन्मे
मनश्शिवसङ्कल्पमस्तु ॥ यः प्राणतो निमिषतो
महित्वैक इद्राजा जगतो बभूव। य ईशे अस्य
द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम
तन्मे मनश्शिवसङ्कल्पमस्तु ॥ य आत्मदा
बलदा यस्य विश्व उपासते प्रशिष-ँय्यस्य देवाः।
यस्य छायाऽमृतँय्यस्य मृत्युः कस्मै देवाय
हविषा विधेम तन्मे मनश्शिवसङ्कल्पमस्तु ॥
यो रुद्रो अग्नौ यो अप्सु य ओषधीषु
यो रुद्रो विश्वा भुवनाऽऽविवेश तस्मै रुद्राय

नमो अस्तु तन्मे मनश्शिवसङ्कल्पमस्तु ॥

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीꣳ सर्वभूतानां तामिहोपह्वये श्रियन्तन्मे
मनश्शिवसङ्कल्पमस्तु ॥

य इदꣳशिवसङ्कल्पꣳसदाध्यायन्ति ब्राह्मणाः ।
ते परं मोक्षङ्गमिष्यन्ति तन्मे मनश्शिवसङ्कल्पमस्तु ॥

* / हृदयाय नमः ॥

पुरुषसूक्तम्

ॐ सहस्रशीर्षा पुरुषः। सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशाङ्गुलम् ।
पुरुष एवेदꣳ सर्वम् । यद्भूतं यच्च भव्यम् ।
उतामृतत्वस्येषानः । यदन्नेनातिरोहति ।
एतावानस्य महिमा । अतो ज्यायाꣳश्च पूरुषः।
पादोऽस्य विश्वा भूतानि । त्रिपादस्यामृतं दिवि।
त्रिपादूर्ध्व उदैत्पुरुषः । पादोऽस्येहाऽऽभवात्पुनः ।

ततो विश्वङ्व्यक्रामत् । साशनानशने अभि ।
तस्माद्विराडजायत । विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत । पश्चाद्भूमिमथो पुरः ।
यत्पुरुषेण हविषा । देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यम् । ग्रीष्म इध्मश्शरद्धविः ।
सप्तास्यासन्परिधयः । त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वानाः । अबध्नन्पुरुषं पशुम् ।
तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषञ्जातमग्रतः ।
तेन देवा अयजन्त । साध्या ऋषयश्च ये ।
तस्माद्यज्ञात्सर्वहुतः । संभृतं पृषदाज्यम् ।
पशूꣳस्ताꣳश्चक्रे वायव्यान् । आरण्यान्ग्राम्याश्च ये ।
तस्माद्यज्ञात्सर्वहुतः । ऋचः सामानि जज्ञिरे ।
छन्दाꣳसि जज्ञिरे तस्मात् । यजुस्तस्मादजायत ।
तस्मादश्वा अजायन्त । ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात् । तस्माज्जाता अजावयः ।
यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् ।
मुखङ्किमस्य कौ बाहू । कावूरू पादावुच्येते ।






ब्राह्मणोऽस्य मुखमासीत्। बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः । पद्भ्याꣳ शूद्रो अजायत। चन्द्रमा
मनसो जातः। चक्षोः सूर्यो अजायत । मुखादिन्द्रश्चाग्निश्च ।
प्राणाद्वायुरजायत । नाभ्या आसीदन्तरिक्षम् । शीर्ष्णो द्यौः
समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात्। तथा लोकाꣳ
अकल्पयन् । वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं
तमसस्तु पारे। सर्वाणि रूपाणि विचित्य धीरः। नामानि
कृत्वाऽभिवदन्यदास्ते । धाता पुरस्ताद्यमुदाजहार। शक्रः
प्रविद्वान्प्रदिशश्चतस्रः। तमेवं विद्वानमृत इह भवति ।
नान्यः पन्था अयनाय विद्यते । यज्ञेन यज्ञमयजन्त देवाः ।
तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्ते।
यत्र पूर्वे साध्याः सन्ति देवाः। * । शिरसे स्वाहा ॥

ॐ नमो नारायणाय ॥ ॥ उत्तरनारायणम् ॥

अद्भ्यः संभूतः पृतिव्यै रसाच्च । विश्वकर्मणः समवर्तताधि। तस्य
त्वष्टा विदधद्रूपमेति । तत्पुरुषस्य विश्वमाजानमग्रे । वेदाहमेतं
पुरुषं महान्तम् । आदित्यवर्णं तमसः परस्तात् । तमेवं
विद्वानमृत इह भवति । नान्यः पन्था विद्यतेयऽनाय ।




महान्यासम्



प्रजापतिश्चरति गर्भे अन्तः । अजायमानो बहुधा विजायते ।
तस्य धीराः परिजानन्ति योनिम् । मरीचीनां पदमिच्छन्ति
वेदसः ॥ यो देवेभ्य आतपति । यो देवानां पुरोहितः ।
पूर्वो यो देवेभ्यो जातः । नमो रुचाय ब्राह्मये । रुचं ब्राह्मम्
जनयन्तः । देवा अग्रे तदब्रुवन् । यस्त्वैवं ब्राह्मणो विद्यात् ।
तस्य देवा असन् वशे । ह्रीश्च ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे
पार्श्वे । नक्षत्राणि रूपम् । अश्विनौ व्यात्तम् । इष्टम् मनिषाण ।
अमुं मनिषाण । सर्वम् मनिषाण ॥ * । शिखायै वषट् ॥

अप्रतिरथम्

आशुश्शिशानो वृषभो न युध्मो घनाघनः
क्षोभणश्चर्षणीनाम् । सङ्क्रन्दनोऽनिमिष
एकवीरश्शतꣳसेना अजयत्साकमिन्द्रः ।
सङ्क्रन्दनेनानिमिषेण जिष्णुना युत्कारेण
दुश्च्यवनेन धृष्णुना । तदिन्द्रेण जयत
तत्सहद्ध्वँ युधोनर इषुहस्तेन वृष्णा ।

स इषुहस्तै स्सनिषङ्गिभिर्वशी सꣳस्रष्टा सयुध

इन्द्रो गणेन । सꣳस्रष्टजित् सोमपा

बाहुशद्ध्यूद्र्ध्व धन्वा प्रतिहिताभिरस्ता ।

बृहस्पते परिदीया रथेन रक्षोहाऽमित्राꣳ

अपबाधमानः । प्रभञ्जन्थ्सेनाः प्रमृणो युधा

जयन्नस्माकमेद्ध्यविता रथानाम् । गोत्रभिदङ्गोविदं

वज्रबाहुञ्जयन्तमज्म प्रमृणन्तमोजसा ।

इमꣳसजाता अनुवीरयद्ध्वमिन्द्रꣳसखायोऽनु

सꣳरभद्ध्वम् । बलविज्ञायस्स्थविरः

प्रवीरस्सहस्वान् वाजी सहमान उग्रः ।

अभिवीरो अभिसत्त्वा सहोजा जैत्रमिन्द्र रथमातिष्ठ

गोवित् । अभिगोत्राणि सहसा गाहमानोऽदायो

वीरश्शतमन्युरिन्द्रः । दुश्च्यवनः

पृतनाषाडयुद्ध्योऽस्माकꣳसेना अवतु प्रयुथ्सु ।

इन्द्र आसान्नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु

सोमः। देवसेनानामभिभञ्जतीनाञ्जयन्तीनां मरुतो

यन्त्वग्रे । इन्द्रस्य वृष्णो वरुणस्य राज्ञ

आदित्यानां मरुताꣳशर्द्ध उग्रम् । महामनसां

भुवनच्यवानाङ्घोषो देवानाञ्जयतामुदस्थात् ।

अस्माकमिन्द्र स्समृतेषु द्ध्वजेश्वस्माकय्ँया

इषवस्ता जयन्तु । अस्माकव्वीँरा उत्तरे

भवन्त्वस्मानु देवा अवता हवेषु ।

उद्धर्षय मघवन्नायुधान्युथ्सत्त्वनां मामकानां

महाꣳसि । उद्वृत्रहन्वाजिनां

वाजिनान्युद्रथानाञ्जयतामेतु घोषः । उपप्रेत

जयता नरस्स्थिरावस्सन्तु बाहवः । इन्द्रो वश्शर्म

यच्छत्त्वनाधृष्या यथाऽसथ। अवसृष्टा परापत

शरव्ये ब्रह्मसꣳशिता । गच्छामित्रान्प्रविश

मैषाङ्कञ्चनोच्छिषः । मर्माणि ते वर्मभिश्छादयामि

सोमस्त्वा राजाऽमृतेनाभिऽवस्ताम् । उरोर्वरीयो

वरिवस्ते अस्तु जयन्तन्त्वामनुमदन्तु देवाः ।

यत्र बाणास्संपतन्ति कुमारा विशिखा इव ।

इन्द्रो नस्तत्र वृत्रहा विश्वाहा शर्म यच्छतु ॥

*\ *कवचाय हुम् ॥*

प्रतिपूरुषमित्यनुवाकः (१)

प्रतिपूरुषमेककपालान्निर्वपत्येकमतिरिक्त यँयावन्तो

गृह्यास्मस्तेभ्यः कमकरं पशूनाꣳशर्मासि शर्म

यजमानस्य शर्म मे यच्छैक एव रुद्रो न

द्वितीयाय तस्थ आखुस्ते रुद्र पशुस्तञ्जुषस्वैष

ते रुद्र भाग स्सह स्वस्राऽम्बिकया तञ्जुषस्व
भेषजङ्गवेऽश्वाय पुरुषाय भेषजमथो अस्मभ्यं
भेषजꣳसुभेषज य्यँथासति । सुगं मेषाय मेष्या
अवाम्ब रुद्रमदिमह्यव देवं त्र्यम्बकम् । यथा
नश्श्रेयसः करद्यथा नो वस्यसः करद्यथा नः
पशुमतः करद्यथानो व्यवसाययात् ॥
त्र्यम्बकय्यँजामहे सुगन्धिं पुष्टिवर्द्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥
एष ते रुद्र भागस्तञ्जुषस्व तेनावसेन परो
मूजवतोऽतीह्यवततधन्वा पिनाकहस्तः कृत्तिवासाः ॥

प्रतिपूरुषमित्यनुवाकः (२)

प्रतिपूरुषमेककपालान्निर्वपति । जाता एव प्रजा
रुद्रान्निरवदयते । एकमतिरिक्तम् । जनिष्यमाणा





एव प्रजा रुद्रान्निरवदयते। एककपाला भवन्ति।
एकधैव रुद्रन्निरवदयते । नाभिघारयति ।
यदभिघारयेत् । अन्तरवचारिणꣳ रुद्रङ्कुर्यात् ।
एकोल्मुकेनयन्ति । तद्धि रुद्रस्य भागधेयम् ।
इमाद्दिशय्ँयन्ति । एषा वै रुद्रस्य दिक् ।
स्वायामेव दिशि रुद्रन्निरवदयते । रुद्रो वा
अपशुकाया आहुत्यै नातिष्ठत। असौ ते पशुरिति
निर्दिशेद्यन्द्विष्यात् । यमेव द्वेष्टि । तमस्मै
पशुन्निर्दिशति । यदि न द्विष्यात् । आखुस्ते
पशुरिति ब्रूयात् । न ग्राम्यान् पशून् हिनस्ति ।
नारण्यान् । चतुष्पथे जुहोति । एष वा अग्नीनां
पड्बीशो नाम। अग्निवत्येव जुहोति। मद्ध्यमेन
पर्णेन जुहोति । स्रुग्घ्येषा । अथो खलु ।
अन्तमेनैव होतव्यम्। अन्तत एव रुद्रन्निरवदयते ।

एष ते रुद्र भागस्सह स्वस्राऽम्बिकयेत्याह ।
शरद्वा अस्याम्बिका स्वसा । तया वा एष
हिनस्ति । यꣳहिनस्ति । तयैवैनꣳसह
शमयति । भेषजङ्गव इत्याह । यावन्त एव
ग्राम्याः पशवः । तेभ्यो भेषजङ्करोति । अवाम्ब
रुद्रमदिमहीत्याह । आशिषमेवैतामाशास्ते ।
त्र्यम्बकँय्यजामह इत्याह । मृत्योर्मुक्षीय
माऽमृतादिति वावैतदाह । उत्किरन्ति । भगस्य
लीप्सन्ते । मूते कृत्वा सजन्ति । यथा
जनँय्यतेऽवसङ्करोति । तादृगेवतत् । एष ते रुद्र
भाग इत्याह निरवत्यै । अप्रतीक्षमायन्ति ।
अपः परिषिञ्चति । रुद्रस्यान्तर्हित्यै । प्रवा
एतेऽस्माँल्लोकाच्च्यवन्ते । ये त्र्यम्बकैश्चरन्ति ।

आदित्यश्चरुं पुनरेत्य निर्व्वपति । इय व्वाँ अदितिः । अस्यामेव प्रतितिष्ठन्ति ॥ * / *नेत्रत्रयाय वौषट् ॥*

॥ त्वमग्ने रुद्रानुवाकः ॥

त्वमग्ने रुद्रो असुरो महो दिवस्त्वꣳ शर्द्धो मारुतं पृक्ष ईशिषे । त्वं वातैररुणैर्यासि शङ्गयस्त्वं पूषा विधतः पासि नुत्मना ॥

आ वो राजानमध्वरस्य रुद्रꣳ होतारꣳ सत्ययजꣳरोदस्योः । अग्निं पुरा तनयित्नोरचित्ता-द्धिरण्यरूप-मवसे कृणुध्वम् ।

अग्निर्होता निषसादा यजीयानुपस्थे मातुः सुरभावु लोके । युवा कविः पुरुनिष्ठः (१) ऋतावा धर्ताकृष्टीना मुत मध्य इद्धः ।

साध्वीमकर्देववीतिन्नो अद्य यज्ञस्य

जिह्वामविदाम गुह्याम् । स आयुरागात्

सुरभिर्वसानो भद्रामकर्देवहूतिं नो अद्य ।

अक्रन्ददग्निस्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः

समञ्जन् । सद्यो जज्ञानो विहीमिद्धो अख्यदा

रोदसी भानुना भात्यन्तः । त्वे वसूनि पुर्वणीक

(२) होतर्दोषा वस्तो रेरिरे यज्ञियासः । क्षामेव

विश्वा भुवनानि यस्मिन्त्सꣳ सौभगानि दधिरे

पावके । तुभ्यं ता अङ्गिरस्तम विश्वाः सुक्षितयः

पृथक् । अग्ने कामाय येमिरे । अश्याम

वाजमभिवाजयन्तोऽश्याम द्युम्नमजराजरं ते ।

श्रेष्ठं यविष्ठ भारताग्ने द्युमन्तमा भरा । (३)

वसो पुरुस्पृहꣳरयिम् । स श्वितानस्तन्यतू

रोचनस्था अजरेभिर्नानदद्भिर्यविष्ठः ।
यः पावकः पुरुतमः पुरूणि पृथून्यग्नि रनुयाति
भर्वन् । आयुष्टे विश्वतो दधदयमग्नि र्वरेण्यः ।
पुनस्ते प्राण आयति परा यक्ष्मꣳ सुवामि ते ।
आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीको
घृतयोनिरेधि । घृतं पीत्वा मधु चारु गव्यं
पितेव पुत्रमभि (४) रक्षतादिमम् । तस्मै ते
प्रतिहर्य ते जातवेदो विचर्षणे । अग्ने जनामि
सुष्टुतिम् । दिवस्परि प्रथमं जज्ञे अग्निरस्मद्
द्वितीयं परि जातवेदाः । तृतीयमप्सु नृमणा
अजस्रमिन्धान एनं जरते स्वाधीः । शुचिः
पावक वन्द्योऽग्ने बृहद्विरोचसे । त्वं घृतेभिराहुतः ।
दृशानो रुक्म उर्व्या व्यद्यौद् दुर्मर्षमायुः

श्रिये रुचानः । अग्निरमृतो अभवद्वयोभि-

(५) र्यदेनं द्यौरजनयत् सुरेताः । आ यदिषे

नृपतिं तेज आनट्छुचिरेतो निषिक्तं द्यौरभीके ।

अग्निः शर्ध-मनवद्यं युवानꣳ स्वाधियं जनयत्

सूदयच्च । स तेजीयसा मनसा त्वोत उत

शिक्ष स्वपत्यस्य शिक्षोः । अग्ने रायो

नृतमस्य प्रभूतौ भूयाम ते सुष्टुतयश्च वस्वः ।

अग्ने सहन्त-माभर द्युम्नस्य प्रासहा रयिम् ।

विश्वाय (६) यूचर्षणीरभ्यासा वाजेषु सासहत् ।

त्मग्ने पृतनासहꣳ रयिꣳ सहस्व आभर ।

त्वꣳहि सत्यो अद्भुतो दाता वाजस्य

गोमतः । उक्षान्नाय वशान्नाय सोमपृष्ठाय

वेधसे । स्तोमैर्विधेमाग्नये । वद्माहि सूनो

अस्यद्म सद्वा चक्रे अग्निर्जनुषा ज्मान्नम् ।
स त्वन्न ऊर्जसन ऊर्जं धा राजेवजे-रवृके
क्षेष्यन्तः ॥ अग्न आयूꣳषि (७) पवस आसुवोर्ज
मिषं च नः । आरे बाधस्व दुच्छुनाम् ।
अग्ने पवस्व स्वपा अस्मे वर्चस्सुवीर्यम् । दधत्
पोषꣳ रयिं मयि । अग्ने पावक रोचिषा मन्द्रया
देवजिह्वया । आ देवान् वक्षि यक्षि च । स नः
पावक दीदिवोऽग्ने देवाꣳ इहावह । उप यज्ञꣳ
हविश्च नः । अग्निः शुचिव्रततमः शुचिर्विप्रः
शुचिः कविः । शुचीरोचत आहुतः ।
उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते ।
तव ज्योतीꣳष्यर्चयः ॥

॥ शत रुद्रीयम् ॥

त्वमग्ने रुद्रो असुरो महो दिवः । त्वꣳ शर्द्धो मारुतं पृक्ष ईशिषे । त्वं वातैररुणैर्यासि शङ्गयः । त्वं पूषा विधतः पासि नुत्मना ॥

देवा देवेषु श्रयद्ध्वम् । प्रथमा द्वितीयेषु श्रयद्ध्वम् । द्वितीयास्तृतीयेषु श्रयद्ध्वम् । तृतीयाश्चतुर्थेषु श्रयद्ध्वम् । चतुर्थाः पञ्चमेषु श्रयद्ध्वम् । पञ्चमाष्षष्ठेषु श्रयद्ध्वम् । षष्ठास्सप्तमेषु श्रयद्ध्वम् । सप्तमा अष्टमेषु श्रयद्ध्वम् । अष्टमा नवमेषु श्रयद्ध्वम्। नवमा दशमेषु श्रयद्ध्वम् । दशमा एकादशेषु श्रयद्ध्वम्। एकादशा द्वादशेषु श्रयद्ध्वम् । द्वादशास्त्रयोदशेषु श्रयद्ध्वम्। त्रयोदशाश्चतुर्दशेषु श्रयद्ध्वम् । चतुर्दशाः पञ्चदशेषु श्रयद्ध्वम् । पञ्चदशाष्षोडशेषु श्रयद्ध्वम् । षोडशास्सप्तदशेषु

श्रयद्ध्वम् । सप्तदशा अष्टादशेषु श्रयद्ध्वम् ।

अष्टादशा एकान्नविꣳशेषु श्रयद्ध्वम् ।

एकान्नविꣳशा विꣳशेषु श्रयद्ध्वम् । विꣳशा

एकविꣳशेषु श्रयद्ध्वम्। एकविꣳशा द्वाविꣳशेषु

श्रयद्ध्वम्। द्वाविꣳशा स्त्रयोविꣳशेषु श्रयद्ध्वम्।

त्रयोविꣳशा-श्चतुर्विꣳशेषु श्रयद्ध्वम ।

चतुर्विꣳशाः पञ्चविꣳशेषु श्रयद्ध्वम् ।

पञ्चविꣳशाष्षड्विꣳशेषु श्रयद्ध्वम् ।

षड्विꣳशास्सप्त विꣳशेषु श्रयद्ध्वम् ।

सप्तविꣳशा अष्टाविꣳशेषु श्रयद्ध्वम् ।

अष्टाविꣳशा एकान्नत्रिꣳशेषु श्रयद्ध्वम् ।

एकान्नत्रिꣳशा स्त्रिꣳशेषु श्रयद्ध्वम् । त्रिꣳशा

एकत्रिꣳशेषु श्रयद्ध्वम्। एकत्रिꣳशा द्वात्रिꣳशेषु

श्रयद्ध्वम् । द्वात्रिꣳशा स्त्रयस्त्रिꣳशेषु

श्रयद्ध्वम्। देवा स्त्रिरेकादशा स्त्रिस्त्रयस्त्रिꣳशाः।
उत्तरे भवत। उत्तर वर्त्मान उत्तर सत्त्वानः ।
यत्काम इदञ्जुहोमि । तन्मे समृद्ध्यताम् ।
वयꣴस्याम पतयो रयीणाम्। भूर्भुवस्स्वस्स्वाहा ॥

* ॥ *अस्त्राय फट्* ॥

॥ (पञ्चाङ्ग सकृज्जपेत्) ॥

हꣳसश्शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथि
र्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा
गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥
प्रतद्विष्णुस्तवते वीर्य्याय । मृगो न भीमः
कुचरो गिरिष्ठाः। यस्योरुषु त्रिषु विक्रमणेषु ।
अधिक्षियन्ति भुवनानि विश्वा ॥
त्र्यम्बकꣴय्यजामहे सुगन्धिं पुष्टिवर्द्धनम् ।

उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥
तत्सवितुर्वृणीमहे । वयद्देवस्य भोजनम् ।
श्रेष्ठꣳसर्वधातमम् । तुरं भगस्य धीमहि ॥
विष्णुर्योनिं कल्पयतु । त्वष्टा रूपाणि पिꣳशतु ।
आसिञ्चतु प्रजापतिः । धाता गर्भन्दधातु ते ॥

॥ अष्टाङ्ग प्रणामः ॥

हिरण्यगर्भ-स्समवर्तताग्रे भूतस्य जातः पतिरेक
आसीत् । स दाधारपृथिवीन्द्यामुतेमाङ्कस्मै
देवाय हविषा विधेम ॥ (# = *उमामहेश्वराभ्यान्नमः ।*)
यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो
बभूव । य ईशे अस्य द्विपदश्चतुष्पदः कस्मै
देवाय हविषा विधेम ॥ #
ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन

आवः। स बुध्निया उपमा अस्य विष्ठा स्सतश्च योनिमसतश्च विवः ॥ #

मही द्यौः पृथिवी च न इमं य्यज्ञं मिमिक्षताम्। पिपृतान्नो भरीमभिः ॥ #

उपश्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितञ्जगत्। स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद्दवीयो अपसेध शत्रून् । #

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् । युयोद्ध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नमउक्तिं विधेम ॥ #

या ते अग्ने रुद्रिया तनूस्तया नः पाहि तस्यास्ते स्वाहा ॥ *(या ते अग्नेऽयाशया रजाशया हराशया तनूर्वर्षिष्ठा गह्वरेष्ठोऽग्रं वचो*

अपावधीन्त्वेषम् वचो अपावधीँस्वाहा) ॥ #

इमयँय्यमासतरमाहि सीदाङ्गिरोभिःपितृभि-

स्सव्विँदानः। आत्त्वा मन्त्राः कविशस्ता

वहन्त्वेना राजन् हविषा मादयस्व ॥ #

(उमामहेश्वराभ्यान्नमः)

(उरसा शिरसा दृष्ट्या मनसा वचसा तथा ।

पद्भ्यां कराभ्यां कर्णाभ्यां प्रणामोऽष्टाङ्ग उच्यते ।

) #

अथद्ध्यानम् ॥

ॐ नमो भगवते रुद्राय ॥

ॐ अथात्मानं शिवात्मानं श्रीरुद्ररूपं ध्यायेत् ॥

शुद्धस्फटिक सङ्काशं त्रिणेत्रम् पञ्चवक्त्रकम् ।

गङ्गाधरं दशभुजं सर्वाभरण भूषितम् ॥

नीलग्रीवं शशाङ्काङ्कं नागयज्ञोपवीतिनम् ।

व्याघ्रचर्मोत्तरीयञ्च वरेण्यमभयप्रदम् ॥

कमण्डल्वक्षसूत्रे च दधानं शूलपाणिनम् ।

ज्वलन्तं पिङ्गळजटं शिखामद्ध्योद्धारिणम् ।
वृषस्कन्ध समारूढं उमादेहार्द्ध धारिणम् ।
अमृतेनाप्लुतं हृष्टं दिव्यभोग समन्वितम् ॥
दिग्देवता समायुक्तं सुरासुर नमस्कृतम् ।
नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययम् ॥
सर्वव्यापिनमीशानं रुद्रं वै विश्वरूपिणम् ।
एवन्ध्यात्वा द्विजस्सम्यक् ततो यजनमारभेत् ॥

षष्ठः न्यासः (लघु न्यासः)

प्रजनने ब्रह्मा तिष्ठतु । पादयोर्विष्णुस्तिष्ठतु ।
हस्तयो र्हरस्तिष्ठतु । बाह्वोरिन्द्रस्तिष्ठतु ।
जठरेऽग्निस्तिष्ठतु । हृदये शिवस्तिष्ठतु ।
कण्ठे वसवस्तिष्ठन्तु । वक्त्रे सरस्वती तिष्ठतु ।
नासिकयोर्वायुस्तिष्ठतु । नयनयोश्चन्द्रादित्यौ
तिष्ठेताम् । कर्णयोरश्विनौ तिष्ठेताम् ।
ललाटे रुद्रास्तिष्ठन्तु । मूर्ध्नि आदित्यास्तिष्ठन्तु ।

 



शिरसि महादेवस्तिष्ठतु। शिखायां वामदेवस्तिष्ठतु।
पृष्ठे पिनाकी तिष्ठतु । पुरतश्शूली तिष्ठतु ।
पार्श्वयोश्शिवाशङ्करौ तिष्ठेताम् । सर्वतो
वायुस्तिष्ठतु । ततो बहिः सर्वतोऽग्निर्ज्वालामाला
परिवृतस्तिष्ठतु । सर्वेश्वङ्गेषु सर्वा देवता
यथास्थानं तिष्ठन्तु । माꣳ रक्षन्तु। माँ
सकुटुम्बं रक्षन्तु ॥ विपश्चिते पवमानाय गायत ।
महीनधाराऽत्यन्धो अर्षति। अहिर् ह जीर्णामति
सर्पति त्वचम्। अत्यो न क्रीडन्न सरद्वृषा
हरिः। उपयामगृहीतोऽसि मृत्यवे त्वा
जुष्टङ्गृह्णामि। एषते योनिर्मृत्यवे त्वा।
अपमृत्युमपक्षुधम् । अपेतः शपथं जहि ।
अधानो अग्न आवह। रायस्पोषꣳसहस्रिणम्॥

ये ते सहस्रमयुतं पाशाः । मृत्यो मर्त्याय

हन्तवे । तान् । यज्ञस्य मायया । सर्वानव

यजामहे । भक्षोऽस्यमृत भक्षः । तस्य ते

मृत्युपीतस्यामृतवतः । स्वगाकृतस्य मधुमतः ।

उपहूतस्योपहूतो भक्षयामि । मन्द्राऽभिभूतिः

केतुर्यज्ञानाँव्वाक् । असावेहि । अन्धो जागृविः

प्राण । असावेहि । बधिरआक्रद्वयितरपान ।

असावेहि । अहस्तोस्त्वा चक्षुः । असावेहि ।

अपादाशो मनः । असावेहि । कवेविप्रचित्तेश्रोत्र ।

असावेहि । सुहस्तस्सुवासाः । शूषो नामास्यमृतो

मर्त्येषु । असावेहि । अग्निर्मे वाचि श्रितः ।

वाग्घृदये । हृदयं मयि । अहममृते । अमृतं

ब्रह्मणि । वायुर्मे प्राणे श्रितः । प्राणो हृदये ।

हृदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

सूर्यो मे चक्षुषि श्रितः । चक्षुर्हृदये ।

हृदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

चन्द्रमा मे मनसि श्रितः । मनो हृदये ।

हृदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

दिशो मे श्रोत्रे श्रिताः । श्रोत्रꣳ हृदये ।

हृदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

आपो मे रेतसि श्रिताः । रेतो हृदये ।

हृदयं मयि। अहममृते । अमृतं ब्रह्मणि ।

पृथिवी मे शरीरे श्रिता । शरीरꣳ हृदये ।

हृदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

ओषधिवनस्पतयो मे लोमसु श्रिताः ।

लोमानि हृदये । हृदयं मयि । अहममृते ।

अमृतं ब्रह्मणि । इन्द्रो मे बले श्रितः ।

बलꣳ हृदये । हृदयं मयि । अहममृते ।

अमृतं ब्रह्मणि । पर्जन्यो मे मूर्ध्नि श्रितः ।

मूर्धा हृदये । हृदयं मयि । अहममृते ।

अमृतं ब्रह्मणि । ईशानो मे मन्यौ श्रितः ।

मन्युर्हृदये । हृदयं मयि । अहममृते ।

अमृतं ब्रह्मणि । आत्मा म आत्मनि श्रितः ।

आत्मा हृदये । हृदयं मयि । अहममृते ।

अमृतं ब्रह्मणि । पुनर्म आत्मा पुनरायुरागात् ।

पुनः प्राणः पुनराकूतमागात् ।

वैश्वानरो रश्मिभिर्वावृधानः ।

अन्तस्तिष्ठत्वमृतस्य गोपाः ॥

आराधितो मनुष्यैस्त्वम् सिद्धैर्देवासुरादिभिः ॥

आराधयामि भक्त्या त्वाम् अनुगृहाण महेश्वर ॥

(ध्यानम्)

ध्यायेन्निरामयं वस्तु सर्गस्थिति लयाधिकम् ।

निर्गुणन्निष्कळन्नित्यं मनोवाचामगोचरम् ॥

गङ्गाधरं शशिधरं जटामकुट शोभितम् ।

श्वेतभूति त्रिपुण्ड्रेण विराजित ललाटकम् ॥

लोचनत्रय संपन्नं स्वर्णकुण्डल शोभितम् ।

स्मेराननञ्चतुर्बाहुं मुक्ताहारोपशोभितम् ॥

अक्षमालां सुधाकुम्भं चिन्मयीं मुद्रिकामपि ।

पुस्तकञ्च भुजैर्दिव्यैः दधानं पार्वतीपतिम् ॥

श्वेताम्बरधरं श्वेतं रत्नसिंहासनस्थितम् ।

सर्वाभीष्ट प्रदातारं वटमूल निवासिनम् ॥

वामाङ्केसंस्थितां गौरीं बालार्कायुतसन्निभम् ।

जपाकुसुम साहस्र समान श्रियमीश्वरीम् ॥
सुवर्णरत्नखचित मकुटेन विराजितम् ।
ललाटपट्ट संराजत् सल्लँग्नतिलकाञ्चिताम् ॥
राजीवायत नेत्रान्तां नीलोत्पल दळेक्षणाम् ।
सन्तप्तहेमरचित ताटङ्काभरणान्विताम् ॥
ताम्बूलचर्वणरत रक्तजिह्वा विराजिताम् ।
पताकाभरणोपेतां मुक्ताहारोपशोभितम् ॥
स्वर्णकङ्कणसंयुक्तैः चतुर्भि-र्बाहुभि-र्युताम् ।
सुवर्णरत्नखचित काञ्चीदाम विराजिताम् ॥
कदळीलळितस्तम्भ सन्निभोरु युगान्विताम् ।
श्रिया विराजित पदां भक्तत्राण परायणाम् ॥
अन्योन्याश्लिष्ट हृद्बाहू गौरीशङ्करसंज्ञकम् ।
सनातनं परं ब्रह्म पतमात्मानमव्ययम् ॥
आवाहयामि जगतां ईश्वरं परमेश्वरम् ॥

आवाहनम् - आत्वा वहन्तु हरय

स्सचेतसश्श्वेतैरश्वै स्सहकेतुमद्भिः ।

वाताजितैर्बलवद्भि-र्मनोजवैरायाहि शीघ्रं

मम हव्याय शर्वोम् --

त्र्यम्बकँय्यजामहे सुगन्धिं पुष्टिवर्द्धनम् ।

उर्वारुकमिव बन्धनान्मृत्यो र्मुक्षीय माऽमृतात् ।

गौरीमिमाय सलिलानि तक्षत्येकपदि द्विपदी सा

चतुष्पदी । अष्टापदी नवपदी बभूवुषी

सहस्राक्षरा परमे व्योमन्न् ॥

ॐ नमस्ते रुद्रमन्यव उतोत इषवे नमः ।

नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ॥

ओं ह्रीं नमश्शिवाय । सद्योजातं प्रपद्यामि ।

॥ प्राणप्रतिष्ठा ॥

२॥ आसनम् - या त इषु ... रुद्रमृडय ।

३॥ पाद्यम् - या ते रुद्र ...॥ चाकशीहि ।

४॥ अर्घ्यम् - यामिषुं गिरिशन्त ...॥

५॥ आचमनम् - शिवेन वचसा त्वा ...

६॥ मधुपर्कम् - अदूध्यवोचदधिवक्ता ...

७॥ स्नानम् - असौ यस्ताम्रो अरुण ...

८॥ वस्त्रोत्तरीयम् - असौ योऽवसर्पति ...

९॥ उपवीयतम् - नमो अस्तु नीलग्रीवाय ...

१०॥ गन्धम् - प्रमुञ्च ...

११॥ पुष्पम् - अवतत्य धनुस्त्वं ...

१२॥ अर्चना - ॐ भवाय देवाय नमः।

ॐ शर्वाय देवाय नमः। ॐ ईशानाय देवाय नमः।

ॐ पशुपतये देवाय नमः। ॐ रुद्राय देवाय नमः।

ॐ उग्राय देवाय नमः। ॐ भीमाय देवाय नमः।

ॐ महते देवाय नमः ।

ॐ भवस्य देवस्य पत्न्यै नमः। ॐ शर्वस्य देवस्य पत्न्यै नमः। ॐ ईशानस्य देवस्य पत्न्यै नमः।

ॐ पशुपतेर्देवस्य पत्न्यै नमः। ॐ रुद्रस्य देवस्य

पत्न्यै नमः। ॐ उग्रस्य देवस्य पत्न्यै नमः।

ॐ भीमस्य देवस्य पत्न्यै नमः।

ॐ महतो देवस्य पत्न्यै नमः।

ॐ महादेवादिभ्यो रुद्रेभ्यो नमः।

समस्तोपचारान् समर्पयामि ॥

१३॥ धूपम् - विज्यन्धनुः ....

१४॥ दीपम् - या ते हेतिः ....

१५॥ नैवेद्यम् - ॐ भूर्भुवस्सुवः .... ब्रह्मणे स्वाहा। नमस्ते अस्त्वायुधाय ...

१६॥ ताम्बूलम् - ॐ भूर्भुवस्सुवः। परि तेधन्वनो

१७॥ नीराजनम् - नमस्ते अस्तु ....

अर्चना - त्रिशत्या ॥

प्रदक्षिणम् - द्रापे ... ॥

नमस्काराः - सहस्राणि ... ॥

प्रार्थना - चमकानुवाकैः ... ॥

आशास्तेऽयँय्यजमानोऽसौ । आयुराशास्ते ।

सुप्रजास्त्वमाशास्ते । सजातवनस्यामाशास्ते ।
उत्तराद्वेवयज्यामाशास्ते ।
भूयो हविष्करणमाशास्ते । दिव्यन्धामाशास्ते ।
विश्वं प्रियमाशास्ते । यदनेन हविषाऽऽशास्ते ।
तदश्यात्तदृध्यात् । तदस्मै देवा रासन्ताम् ।
तदग्निर्देवो देवेभ्यो वनते । वयमग्नेर्मानुषाः ।
इष्टञ्च वीतञ्च । उभे च नो द्यावापृथिवी
अꣳहस्पाताम् । इहगतिर्वामस्येदञ्च ।
नमो देवेभ्यः ॥ हरिः ओ(३)म् ॥

ॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐ

रुद्र त्रिषति

नमो हिरण्यबाहवे नमः । सेनान्ये नमः ।
दिशाञ्च पतये नमः। नमो वृक्षेभ्यो नमः ।

हरिकेशेभ्यो नमः। पशूनां पतये नमः ।

नमस्सस्पिञ्जराय नमः। त्विषीमते नमः ।

पथीनां पतये नमः। नमो बभ्लुशाय नमः ।

विव्याधिने नमः । अन्नानां पतये नमः ।

नमो हरिकेशाय नमः । उपवीतिने नमः ।

पुष्टानां पतये नमः। नमो भवस्य हेत्यै नमः।

जगतां पतये नमः । नमो रुद्राय नमः ।

आतताविने नमः । क्षेत्राणां पतये नमः ।

नमस्सूताय नमः । अहन्त्याय नमः ।

वनानां पतये नमः । नमो रोहिताय नमः।

स्थपतये नमः । वृक्षाणां पतये नमः ।

नमो मन्त्रिणे नमः । वाणिजाय नमः ।

कक्षाणां पतये नमः । नमो भुवन्तये नमः ।

वारिवस्कृताय नमः । ओषधीनां पतये नमः।

नम उच्चैर्घोषाय नमः । आक्रद्रयते नमः ।
पत्तीनां पतये नमः । नमः कृथ्स्नवीताय नमः ।
धावते नमः । सत्वनां पतये नमः ॥
नमस्सहमानाय नमः । निव्याधिने नमः ।
आव्याधिनीनां पतये नमः । नमः ककुभाय
नमः । निषङ्गिणे नमः । स्तेनानां पतये
नमः । नमो निषङ्गिण नमः । इषुधिमते
नमः । तस्कराणां पतये नमः । नमो वञ्चते
नमः । परिवञ्चते नमः । स्तायूनां पतये
नमः । नमो निचेरवे नमः । परिचराय
नमः । अरण्यानां पतये नमः । नमस्सृकाविभ्यो
नमः । जिघा‌ꣳसद्भयो नमः । मुष्णतां पतये
नमः । नमोऽसिमद्भयो नमः । नक्तञ्चरद्भयो

नमः। प्रकृन्तानां पतये नमः ।

नम उष्णीषिणे नमः। गिरिचराय नमः ।

कुलुञ्चानां पतये नमः ।

नम इषुमद्भ्यो नमः । धन्वाविभ्यश्च नमः ।

वो नमः । नम आतन्वानेभ्यो नमः ।

प्रतिदधानेभ्यश्च नमः । वो नमः ।

नम आयच्छद्भ्यो नमः। विसृजद्भ्यश्च नमः।

वो नमः। नमोऽस्यद्भ्यो नमः। विद्यद्भ्यश्च

नमः। वो नमः । नम आसीनेभ्यो नमः ।

शयानेभ्यश्च नमः। वो नमः। नमः स्वपद्भ्यो

नमः। जाग्रद्भ्यश्च नमः। वो नमः।

नमस्तिष्ठद्भ्यो नमः। धावद्भ्यश्च नमः ।

वो नमः । नमस्सभाभ्यो नमः ।

सभापतिभ्यश्च नमः । वो नमः ।

नमो अश्वेभ्यो नमः । अश्वपतिभ्यश्च नमः ।
वो नमः ॥ नम आव्याधिनीभ्यो नमः ।
विविद्यन्तीभ्यश्च नमः । वो नमः ।
नम उगणाभ्यो नमः । तृꣳहतीभ्यश्च नमः ।
वो नमः । नमो गृत्सेभ्यो नमः ।
गृत्सपतिभ्यश्च नमः । वो नमः । नमो
व्रातेभ्यो नमः । व्रातपतिभ्यश्च नमः । वो
नमः । नमो गणेभ्यो नमः । गणपतिभ्यश्च
नमः । वो नमः । नमो विरूपेभ्यो नमः ।
विश्वरूपेभ्यश्च नमः । वो नमः । नमो महद्भ्यो
नमः । क्षुल्लकेभ्यश्च नमः । वो नमः । नमो
रथिभ्यो नमः । अरथेभ्यश्च नमः । वो नमः ।
नमो रथेभ्यो नमः । रथपतिभ्यश्च नमः । वो

नमः। नमस्सेनाभ्यो नमः। सेनानिभ्यश्च नमः। वो नमः। नमः क्षत्तृभ्यो नमः। संग्रहीतृभ्यश्च नमः। वो नमः। नमस्तक्षभ्यो नमः। रथकारेभ्यश्च नमः। वो नमः। नमः कुलालेभ्यो नमः। कर्मारेभ्यश्च नमः। वो नमः। नमः पुञ्जिष्टेभ्यो नमः। निषादेभ्यश्च नमः। वो नमः। नम इषुकृद्भ्यो नमः। धन्वकृद्भ्यश्च नमः। वो नमः। नमो मृगयुभ्यो नमः। श्वनिभ्यश्च नमः। वो नमः। नमः श्वभ्यो नमः। श्वपतिभ्यश्च नमः। वो नमः॥

नमो भवाय च नमः। रुद्राय च नमः। नमश्शर्वाय च नमः। पशुपतये च नमः।

नमो नीलग्रीवाय च नमः। शितिकण्ठाय च

नमः। नमः कपर्दिने च नमः। व्युप्तकेशाय च

नमः। नमस्सहस्राक्षाय च नमः।

शतधन्वने च नमः। नमो गिरिशाय च नमः।

शिपिविष्टाय च नमः। नमो मीढुष्टमाय च नमः।

इषुमते च नमः । नमो ह्रस्वाय च नमः।

वामनाय च नमः । नमो बृहते च नमः ।

वर्षीयसे च नमः । नमो वृद्धाय च नमः ।

संवृद्ध्वने च नमः । नमो अग्रियाय च नमः।

प्रथमाय च नमः । नम आशवे च नमः ।

अजिराय च नमः । नमश्शीघ्रियाय च नमः ।

शीभ्याय च नमः । नम ऊर्म्याय च नमः ।

अवस्वन्याय च नमः । नमस्स्रोतस्याय च

नमः। द्वीप्याय च नमः ॥

॥ नमो ज्येष्ठाय च नमः । कनिष्ठाय च नमः।

नमः पूर्वजाय च नमः । अपरजाय च नमः।

नमो मध्यमाय च नमः। अपगल्भाय च नमः।

नमो जघन्याय च नमः । बुद्धियाय च नमः।

नमः सोभ्याय च नमः । प्रतिसर्याय च नमः।

नमो याम्याय च नमः । क्षेम्याय च नमः ।

नम उर्वर्याय च नमः । खल्याय च नमः ।

नमश्श्लोक्याय च नमः। अवसान्याय च नमः ।

नमो वन्याय च नमः । कक्ष्याय च नमः ।

नमश्श्रवाय च नमः । प्रतिश्रवाय च नमः ।

नम आशुषेणाय च नमः। आशुरथाय च नमः।

नमश्शूराय च नमः। अवभिन्दते च नमः ।

नमो वर्मिणे च नमः । वरूथिने च नमः ।

नमो बिल्मिने च नमः। कवचिने च नमः ।

नमश्श्रुताय च नमः। श्रुतसेनाय च नमः ॥

नमो दुन्दुभ्याय च नमः। आहनन्याय च नमः।

नमो धृष्णवे च नमः । प्रमृशाय च नमः ।

नमो दूताय च नमः । प्रहिताय च नमः ।

नमो निषङ्गिणे च नमः । इषुधिमते च नमः।

नमस्तीक्ष्णेषवे च नमः । आयुधिने च नमः ।

नमस्स्वायुधाय च नमः । सुधन्वने च नमः।

नमस्स्रुत्याय च नमः । पथ्याय च नमः ।

नमः काट्याय च नमः। नीप्याय च नमः।

नमस्सूद्याय च नमः । सरस्याय च नमः ।

नमो नाद्याय च नमः। वैशन्ताय च नमः।

नमः कूप्याय च नमः। अवट्याय च नमः।

नमो वर्ष्याय च नमः। अवर्ष्याय च नमः।

नमो मेघ्याय च नमः। विद्युत्याय च नमः।

नम ईद्ध्रियाय च नमः। आतप्याय च नमः।

नमो वात्याय च नमः । रेष्मियाय च नमः ।

नमो वास्तव्याय च नमः। वास्तुपाय च नमः॥

नमस्सोमाय च नमः । रुद्राय च नमः ।

नमस्ताम्राय च नमः । अरुणाय च नमः ।

नमश्शङ्गाय च नमः । पशुपतये च नमः ।

नमः उग्राय च नमः । भीमाय च नमः ।

नमो अग्रेवधाय च नमः। धूरेवधाय च नमः।

नमो हन्त्रे च नमः । हनीयसे च नमः ।

नमो वृक्षेभ्यो नमः । हरिकेशेभ्यो नमः ।

नमस्ताराय नमः । नमश्शंभवे च नमः ।

मयोभवे च नमः । नमश्शङ्कराय च नमः ।

मयस्कराय च नमः ।

नमश्शिवाय च नमः ।
शिवतराय च नमः ।

नमस्तीर्थ्याय च नमः । कूल्याय च नमः ।

नमः पार्याय च नमः । अवार्याय च नमः ।

नमः प्रतरणाय च नमः ।

नम उत्तरणाय च नमः ।

नम आतार्याय च नमः । आलाद्याय च नमः ।

नमश्शष्प्याय च नमः । फेन्याय च नमः ।

नमस्सिकत्याय च नमः । प्रवाह्याय च नमः ॥

नमः इरिण्याय च नमः । प्रपथ्याय च नमः ।

नमः किꣳशिलाय च नमः । क्षयणाय च नमः ।

नमः कपर्दिने च नमः । पुलस्तये च नमः ।

नमो गोष्ठ्याय च नमः । गृह्याय च नमः ।

नमस्तल्प्याय च नमः । गेह्याय च नमः ।

नमः काट्याय च नमः । गह्वरेष्ठाय च नमः ।

नमो हृदय्याय च नमः । निवेष्प्याय च नमः ।

नमः पाꣳसव्याय च नमः । रजस्याय च नमः ।

नमश्शुष्क्याय च नमः । हरित्याय च नमः ।

नमो लोप्याय च नमः । उलप्याय च नमः ।

नम ऊर्व्याय च नमः । सूर्म्याय च नमः ।

नमः पर्ण्याय च नमः । पर्णशद्याय च नमः ।

नमोऽपगुरमाणाय च नमः । अभिघ्नते च नमः ।

नम आख्खिदते च नमः । प्रख्खिदते च नमः ।

नमो वो नमः । किरिकेभ्यो नमः ।

देवानाꣳहृदयेभ्यो नमः । नमो विक्षीणकेभ्यो

नमः । नमो विचिन्वत्केभ्यो नमः ।

नम आनिर्हतेभ्यो नमः ।

नम आमीवत्केभ्यो नमः ॥

निधनपतये नमः । निधनपतान्तिकाय नमः ।

ऊर्ध्वाय नमः । ऊर्ध्वलिङ्गाय नमः ।

हिरण्याय नमः । हिरण्यलिङ्गाय नमः ।

सुवर्णाय नमः । सुवर्णलिङ्गाय नमः ।

दिव्याय नमः । दिव्यलिङ्गाय नमः ।

भवाय नमः । भवलिङ्गाय नमः ।

शर्वाय नमः । शर्वलिङ्गाय नमः ।

शिवाय नमः । शिवलिङ्गाय नमः ।

ज्वलाय नमः । ज्वललिङ्गाय नमः ।

आत्माय नमः । आत्मलिङ्गाय नमः ।

परमाय नमः । परमलिङ्गाय नमः ।

एतत्सोमस्य सूर्यस्य

सर्वलिङ्गँ स्थापयति पाणिमन्त्रं पवित्रम् ।

सद्योजातं प्रपद्यामि सद्योजाताय वै नमो
नमः । भवेभवेनातिभवे भवस्व माम् ।
भवोद्भवाय नमः ॥ वामदेवाय नमो
ज्येष्ठाय नमश्श्रेष्ठाय नमो, रुद्राय नमः
कालाय नमः कलविकरणाय नमो,
बलविकरणाय नमो बलाय नमो
बलप्रमथनाय नमस्सर्वभूतदमनाय नमो
मनोन्मनाय नमः॥ अघोरेभ्योऽथ घोरेभ्यो
घोरघोरतरेभ्यः । सर्वेभ्यस्सर्वशर्वेभ्यो नमस्ते
अस्तु रुद्ररूपेभ्यः॥ तत्पुरुषाय विद्महे
महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥
ईशानस्सर्वविद्यानामीश्वरस्सर्वभूतानां
ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे
अस्तु सदाशिवोम् । नमो हिरण्यबाहवे

हिरण्यवर्णाय हिरण्यरूपाय

हिरण्यपतयेऽम्बिकापतय उमापतये

पशुपतये नमो नमः ॥

ऋतꣳसत्यं परंब्रह्मपुरुषं कृष्णपिङ्गलम् ।

ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो

नमः ॥ सर्वो वै रुद्रस्तस्मै रुद्राय

नमो अस्तु । पुरुषो वै रुद्रस्सन्महो

नमो नमः ॥ विश्वं भूतं भुवनं चित्रं

बहुधा जातं जायमानं च यत् ।

सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो

अस्तु ॥ कद्रुद्राय प्रचेतसे मीढुष्टमाय

तव्यसे । वोचेम शन्तमꣳ हृदे ।

सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु ॥

ॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐ

 

महान्यासम्



॥ ॐ नमो भगवते रुद्राय ॥

ॐ नमस्ते रुद्रमन्यव उतोत इषवे नमः ।

नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ॥ (*आवाहनम्*)

या त इषुश्शिवतमा शिवं बभूव ते धनुः ।

शिवा शरव्या या तव तया नो रुद्र मृडय ॥ (*आसनम्*)

या ते रुद्र शिवा तनूरघोराऽपाप काशिनी ।

तया नस्तनुवा शन्तमया गिरिशन्ताभिचाकशीहि ॥ (*पाद्यम्*)

यामिषुङ्गिरिशन्त हस्ते बिभर्ष्यस्तवे ।

शिवाङ्गिरित्र ताङ्कुरु मा हिꣳसीः पुरुषञ्जगत् ॥ (*अर्घ्यम्*)

शिवेन वचसा त्वा गिरिशाच्छावदामसि ।

यथा नस्सर्वमिज्जगदयक्ष्मꣳ सुमना असत् ॥ (*आचमनीयम्*)

अद्ध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।

अहीꣳश्च सर्वाञ्जम्भयन्थ्सर्वाश्च यातुधान्यः ॥ (*मधुपर्कम्*)

असौयस्ताम्रो अरुण उत बभ्रुस्सुमङ्गलः ।

ये चेमाꣳरुद्रा अभितो दिक्षु श्रितास्सहस्रशोऽवैषाꣳ हेड ईमहे ॥

....(*स्नानम्*)

असौ योऽवसर्पति नीलग्रीवो विलोहितः ।




महान्यासम्



उतैनङ्गोपा अदृशन्नदृशन्नुदहार्यः ।

उतैनँविश्वा भूतानि स दृष्टो मृडयाति नः ॥ *(वस्त्रम्)*

नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।

अथो ये अस्य सत्त्वानोऽहन्तेभ्योऽकरन्नमः ॥ *(यज्ञोपवीतम्)*

प्रमुञ्च धन्वनस्त्व-मुभयोरार्त्नियोर्ज्याम् ।

याश्च ते हस्त इषवः परा ताभगवो वप ॥ *(गन्धम्)*

अवतत्य धनुस्त्वꣳ सहस्राक्ष शतेषुधे ।

निशीर्य शल्यानां मुखा शिवो नस्सुमना भव ॥ *(पुष्पम्)*

(त्रिशति अर्चना)

विज्यन्धनुः कपर्दिनो विशल्यो बाणवाꣳ उत ।

अनेशन्नस्येषव आभुरस्य निषङ्गथिः ॥ *(दूपम्)*

या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः ।

तयाऽस्मान्विश्वतस्त्वमयक्ष्मया परिब्भुज ॥ *(दीपम्)*

नमस्ते अस्त्वायुधायानातताय धृष्णवे ।

उभाभ्यामुत ते नमो बाहुभ्यान्तव धन्वने ॥

ॐ भूः .... *(निवेदनम्)*

परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ।

अथो य इषुधिस्तवारे अस्मन्निधेहितम् ॥ *(ताम्बूलम्)*

नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्र्यम्बकाय
त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय
मृत्युञ्जयाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः

॥१॥ (*नीराजनम्*)

श्री श्री श्री श्री श्री श्री श्री श्री श्री श्री श्री श्री श्री श्री श्री -(प्रदक्षिणम्)

द्रापे अन्धसस्पते दरिद्रन्नीललोहित ।
एषां पुरुषाणामेषां पशूनां माभेर्माऽरो मो एषाङ्किञ्चनाममत् ॥
या ते रुद्र शिवा तनूश्शिवा विश्वाहभेषजी ।
शिवा रुद्रस्य भेषजी तया नो मृडजीवसे ॥
इमाꣳ रुद्राय तवसे कपर्दिने *क्षयद्वीराय* प्रभरामहे मतिम् ।
यथा नश्शमसद्द्विपदे चतुष्पदे विश्वं पुष्टङ्ग्रामे अस्मिन्न अनातुरम् ॥
मृडा नो रुद्रोतनो मयस्कृधि *क्षयद्वीराय नमसा विधेम ते ।*
यच्छञ्च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ ॥ मा नो
महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।
मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवः रुद्र रीरिषः ॥
मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान्मानो रुद्र भामितोऽवधीर्हविष्मन्तो नमसा विधेम ते ॥
आरात्ते गोघ्न उत पूरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते अस्तु ।
रक्षा च नो अधि च देव ब्रूह्यधा च नश्शर्म यच्छ द्विबर्हाः ॥
स्तुहि श्रुतङ्गर्तसदय्युँवानं मृगन्न भीममुपहत्नुमुग्रम् ।

मृडा जरित्रे रुद्र स्तवानो अन्यन्ते अस्मन्निवपन्तु सेनाः ॥
परिणो रुद्रस्य हेतिर्वृणक्तु परित्वेषस्य दुर्मतिरघायोः ।
अवस्थिरा मघवद्भ्यस्तनुश्व मीढ्वस्तोकाय तनयाय मृडय ॥
मीढुष्टम शिवतम शिवो नस्सुमना भव ।
परमे वृक्ष आयुधन्निधाय कृत्तिव्वँसान आचर पिनाकं बिभ्रदागहि ॥
विकिरिद विलोहित नमस्ते अस्तु भगवः ।
यास्ते सहस्रꣳहेतयोन्यमस्मन्निवपन्तु ताः ॥
सहस्राणि सहस्रधा बाहुवोस्तव हेतयः ।
तासामीशानो भगवः पराचीना मुखा कृधि ॥

.... (*नमस्कारम्*)

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् ।
तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि ॥
अस्मिन् महत्यर्णवेऽन्तरिक्षे भवा अधि ॥
नीलग्रीवाश्शिति कण्ठाश्शर्वा अधः ***क्षमाचराः*** ॥
नीलग्रीवाश्शितिकण्ठा दिवꣳ रुद्रा उपश्रिताः ॥
ये वृक्षेषु सस्पिञ्जरा नीलग्रीवा विलोहिताः ॥
ये भूतानामधिपतयो विशिखासः कपर्दिनः ॥
ये अन्नेषु विविद्ध्यन्ति पात्रेषु पिबतो जनान् ॥
ये पथां पथिरक्षय ऐलबृदा यव्युधः ॥

ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः ॥

य एतावन्तश्च भूयाꣳसश्च दिशो रुद्रा वितस्थिरे ।

तेषाꣳ सहस्रऽयोजनेऽवधन्वानि तन्मसि ॥

नमो रुद्रेभ्यो ये पृथिव्याँय्येऽन्तरिक्षे ये दिवि येषामन्नव्वाँतो

वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दशप्रतीचीर्दशोदीची

र्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यन्द्विष्मो

यश्च नो द्वेष्टि तँव्वो जम्भे दधामि ॥

त्र्यम्बकँय्यजामहे सुगन्धिं पुष्टिवर्द्धनम् ।

उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥१॥

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो

विश्वा भुवनाऽऽविवेश तस्मै रुद्राय नमो अस्तु ॥२॥

तमुष्टुहि यःस्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य ।

यक्ष्वामहे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य ॥३॥

अयं मे हस्तो भगवानयं मे भगवत्तरः ।

अयं मे विश्वभेषजोऽयꣳ शिवाभिमर्शनः ॥४॥

ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे ।

तान्, यज्ञस्य मायया सर्वानव यजामहे ॥

मृत्यवे स्वाहा । मृत्यवे स्वाहा ॥५॥

ओन्नमो भगवते रुद्राय विष्णवे मृत्युर्मे पाहि ॥

प्राणानाङ्ग्रन्थिरसि रुद्रो मा विशान्तकः ।

तेनान्नेनाप्यायस्व ॥ ६ ॥ ॥ नमो रुद्राय विष्णवे

मृत्युर्मे पाहि ॥ ॥ सदाशिवोऽम् ॥ ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

अनुवाका १ (Paragraph 1)

। शम्भवे नमः ।

ॐ नमो भगवते रुद्राय ।

ॐ नमस्ते रुद्र मन्यव उतो त इषवे नमः ।

नमस्ते अस्तु धन्वने बाहुभ्या मुत ते नमः ॥१॥

या त इषुः शिवतमा शिवं बभूव ते धनुः ।

शिवा शरव्या या तव तया नो रुद्र मृडय ॥२॥

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी । तया

नस्तनुवा शन्तमया गिरिशन्ताभिचाकशीहि ॥३॥

यामिषुं गिरिशंत हस्ते बिभर्ष्यस्तवे ।

शिवां गिरित्र तां कुरु माहिꣳसीः पुरुषञ्जगत् ॥४॥

शिवेन वचसा त्वा गिरिशाच्छावदामसि ।

यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमना असत् ॥५॥

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।

अहीꣳश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः ॥६॥

असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः ।

ये चेमाꣳ रुद्रा अभितो दिक्षु, श्रिताः

सहस्रशोऽवैषाꣳ हेड ईमहे ॥७॥

असौ योऽवसर्पति नीलग्रीवो विलोहितः ।

उतैनं गोपा अदृशन्नदृशन्नुदहार्यः उतैनं विश्वा

भूतानि स दृष्टो मृडयाति नः ॥८॥

नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।

अथो ये अस्य सत्वानोऽहं तेभ्योऽकरन् नमः ॥९॥

प्रमुञ्च धन्वनस्त्वमुभयोरार्त्नियोर्ज्याम् ।

याश्च ते हस्त इषवः परा ता भगवो वप ॥१०॥

अवतत्य धनुस्त्वꣳ सहस्राक्ष शतेषुधे ।

निशीर्य शल्यानां मुखाऽशिवो नः सुमना भव ॥११॥

विज्यं धनुः कपर्दिनो विशल्यो बाणवाꣳ उत ।
अनेशन्नस्येषव आभुरस्य निषङ्गथिः ॥१२॥
या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः ।
तयाऽस्मान् विश्वतस्त्वमयक्ष्मया परिब्भुज ॥१३॥
नमस्ते अस्त्वायुधायानातताय धृष्णवे ।
उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ॥१४॥
परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ।
अथो य इषुधिस्तवारे अस्मन्निधेहि तम् ॥१५॥

नमस्ते अस्तु भगवन् विश्वेश्वराय महादेवाय
त्र्यंबकाय त्रिपुरान्तकाय त्रिकालाग्निकालाय
कालाग्निरुद्राय नीलकण्ठाय मृत्युञ्जयाय
सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः ॥

अनुवाका २ *(Paragraph 2)*

नमो हिरण्यबाहवे सेनान्ये दिशाञ्च पतये नमो ॥१ ॥

नमो वृक्षेभ्यो हरिकेशेभ्यो पशूनां पतये नमो ॥२ ॥

नमः सस्पिञ्जराय त्विषीमते पथीनां पतये नमो ॥३ ॥

नमो बभ्लुशाय विव्याधिनेऽन्नानां पतये नमो ॥४ ॥

नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो ॥५ ॥

नमो भवस्य हेत्यै जगतां पतये नमो ॥६ ॥

नमो रुद्रायाततताविने क्षेत्राणां पतये नमो ॥७ ॥

नमः सूतायाहन्त्याय वनानां पतये नमो ॥८ ॥

नमो रोहिताय स्थपतये वृक्षाणां पतये नमो ॥९ ॥

नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो ॥१० ॥

नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमो ॥११ ॥

नम उच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमो ॥१२॥

नमः कृत्स्नवीताय धावते सत्वनां पतये नमः ॥१३॥

अनुवाका ३ *(Paragraph 3)*

नमः सहमानाय निव्यादिन आव्याधिनीनां पतये नमो
॥१॥ नमः ककुभाय निषङ्गिणे स्तेनानां पतये नमो
॥२॥ नमो निषङ्गिण इषुधिमते तस्कराणां पतये
नमो ॥३॥ नमो वञ्चते परिवञ्चते स्तायूनां पतये
नमो ॥४॥ नमो निचेरवे परिचरायारण्यानां पतये
नमो ॥५॥ नमः सृकाविभ्यो जिघाꣳसद्भ्यो
मुष्णतां पतये नमो ॥६॥ नमोऽसिमद्भ्यो
नक्तञ्चरद्भ्यः प्रकृन्तानां पतये नमो ॥७॥
नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो ॥८॥
नम इषुमद्भ्यो धन्वाविभ्यश्च वो नमो ॥९॥

नम आतन्वानेभ्य प्रतिदधानेभ्यश्च वो नमो ॥१० ॥

नम आयच्छद्भ्यो विसृजद्भ्यश्च वो नमो ॥११ ॥

नमोऽस्यद्भ्यो विध्यद्भ्यश्च वो नमो ॥१२ ॥

नम आसीनेभ्यः शयानेभ्यश्च वो नमो ॥१३ ॥

नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो ॥१४ ॥

नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो ॥१५ ॥

नमः सभाभ्यः सभापतिभ्यश्च वो नमो ॥१६ ॥

नमो अश्वेभ्योऽश्वपतिभ्यश्च वो नमः ॥१७ ॥

अनुवाका ४ (Paragraph 4)

नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो ॥१ ॥

नम उगणाभ्यस्तृꣳहतीभ्यश्च वो नमो ॥२ ॥

नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो ॥३ ॥

नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो ॥४ ॥

नमो गणेभ्यो गणपतिभ्यश्च वो नमो ॥५॥

नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो ॥६॥

नमो महद्भ्यः क्षुल्लकेभ्यश्च वो नमो ॥७॥

नमो रथिभ्योऽरथेभ्यश्च वो नमो ॥८॥

नमो रथेभ्यो रथपतिभ्यश्च वो नमो ॥९॥

नमः सेनाभ्यः सेनानिभ्यश्च वो नमो ॥१०॥

नमः क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो ॥११॥

नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो ॥१२॥

नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो ॥१३॥

नमः पुञ्जिष्टेभ्यो निषादेभ्यश्च वो नमो ॥१४॥

नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो नमो ॥१५॥

नमो मृगयुभ्यः श्वनिभ्यश्च वो नमो ॥१६॥

नमः श्वभ्यः श्वपतिभ्यश्च वो नमः ॥१७॥

अनुवाका ५ (Paragraph 5)

नमो भवाय च रुद्राय च ॥१॥

नमः शर्वाय च पशुपतये च ॥२॥

नमो नीलग्रीवाय च शितिकण्ठाय च ॥३॥

नमः कपर्दिने च व्युप्तकेशाय च ॥४॥

नमः सहस्राक्षाय च शतधन्वने च ॥ ५ ॥

नमो गिरिशाय च शिपिविष्टाय च ॥६॥

नमो मीढुष्टमाय चेषुमते च ॥७॥

नमो ह्रस्वाय च वामनाय च ॥८॥

नमो बृहते च वर्षीयसे च ॥९॥

नमो वृद्धाय च संवृद्ध्वने च ॥ १० ॥

नमो अग्रियाय च प्रथमाय च ॥११॥

नम आशवे चाजिराय च ॥१२॥

नमः शीघ्रियाय च शीभ्याय च ॥१४॥

नम ऊर्म्याय चावस्वन्याय च ॥१५॥

नमः स्रोतस्याय च द्वीप्याय च ॥१६॥

अनुवाका ६ (Paragraph 6)

नमो ज्येष्ठाय च कनिष्ठाय च ॥१॥

नमः पूर्वजाय चापरजाय च ॥२॥

नमो मध्यमाय चापगल्भाय च ॥३॥

नमो जघन्याय च बुध्नियाय च ॥४॥

नमः सोभ्याय च प्रतिसर्याय च ॥५॥

नमो याम्याय च क्षेम्याय च ॥६

नम उर्वर्याय च खल्याय च ॥७॥

नमः श्लोक्याय चावसान्याय च ॥८

नमो वन्याय च कक्ष्याय च ॥९॥

नमः श्रवाय च प्रतिश्रवाय च ॥१०॥

नम आशुषेणाय चाशुरथाय च ॥११॥

नमः शूराय चावभिद्रते च ॥१२॥

नमो वर्मिणे च वरूथिने च ॥१३॥

नमो बिल्मिने च कवचिने च ॥१४॥

नमः श्रुताय च श्रुतसेनाय ॥१५॥

अनुवाका ७ (Paragraph 7)

नमो दुन्दुभ्याय चाऽऽहनन्याय च ॥१॥

नमो धृष्णवे च प्रमृशाय च ॥२॥

नमो दूताय च प्रहिताय च ॥३॥

नमो निषङ्गिणे चेषुधिमते च ॥४॥

नमस्तीक्ष्णेषवे चाऽऽयुधिने च ॥५॥

नमः स्वायुधाय च सुधन्वने च ॥६॥

नमः स्रुत्याय च पथ्याय च ॥७॥

नमः काट्याय च नीप्याय च ॥८॥

नमः सूद्याय च सरस्याय च ॥९॥

नमो नाद्याय च वैशन्ताय च ॥१०॥

नमः कूप्याय चावट्याय च ॥११॥

नमो वर्ष्याय चावर्ष्याय च ॥१२॥

नमो मेघ्याय च विद्युत्याय च ॥१३॥

नम ईध्रियाय चातप्याय च ॥१४॥

नमो वात्याय च रेष्मियाय च ॥१५॥

नमो वास्तव्याय च वास्तुपाय च ॥१६॥

अनुवाका ८ (Paragraph 8)

नमः सोमाय च रुद्राय च ॥१॥

नमस्ताम्राय चारुणाय च ॥२॥

नमः शङ्गाय च पशुपतये च ॥३॥

नम उग्राय च भीमाय च ॥४॥

नमो अग्रेवधाय च दूरेवधाय च ॥५॥

नमो हन्त्रे च हनीयसे च ॥६॥

नमो वृक्षेभ्यो हरिकेशेभ्यो ॥७॥

नमस्ताराय ॥८॥

नमः शंभवे च मयोभवे च ॥९॥

नमः शंकराय च मयस्कराय च ॥१०॥

नमः शिवाय च शिवतराय च ॥११॥

नमस्तीर्थ्याय च कूल्याय च ॥१२॥

नमः पार्याय चावार्याय च ॥१३॥

नमः प्रतरणाय चोत्तरणाय च ॥१४॥

नम आतार्याय चाऽऽलाद्याय च ॥१५॥

नमः शष्प्याय च फेन्याय च ॥१६॥

नमः सिकत्याय च प्रवाह्याय च ॥१७॥

अनुवाका ९ (Paragraph 9)

नम इरिण्याय च प्रपथ्याय च ॥१॥

नमः किꣳशिलाय च क्षयणाय च ॥२॥

नमः कपर्दिने च पुलस्तये च ॥३॥

नमो गोष्ठ्याय च गृह्याय च ॥४॥

नमस्तल्प्याय च गेह्याय च ॥५॥

नमः काट्याय च गह्वरेष्टाय च ॥६॥

नमो ह्रदय्याय च निवेष्प्याय च ॥७॥

नमः पाꣳसव्याय च रजस्याय च ॥८॥

नमः शुष्क्याय च हरित्याय च ॥९॥

नमो लोप्याय चोलप्याय च ॥१०॥

नम ऊर्व्याय च सूर्म्याय च ॥११॥

नमः पर्ण्याय च पर्णशद्याय च ॥१२॥

नमोऽपगुरमाणाय चाभिघ्नते च ॥१३॥

नम आक्खिदते च प्रक्खिदते च ॥१४॥

नमो वः किरिकेभ्यो देवानाꣳ हृदयेभ्यो ॥१५॥

नमो विक्षीणकेभ्यो ॥१६॥ नमो विचिन्वत्केभ्यो ॥१७॥

नम आनिर्हतभ्यो ॥१८॥ नम आमीवत्केभ्यः ॥१९॥

अनुवाका १० (Paragraph 10)

द्रापे अन्धसस्पते दरिद्रन्नीललोहित । एषां
पुरुषाणामेषां पशूनां मा भेर्माऽरो मो एषां
किञ्चनाऽऽममत् ॥१॥

या ते रुद्र शिवा तनूः शिवा विश्वाह भेषजी ।
शिवा रुद्रस्य भेषजी तया नो मृड जीवसे ॥२॥

इमाꣳ रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे
मतिम् । यथा नः शमसद्विपदे चतुष्पदे
विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥३॥ मृडा नो

रुद्रोतनो मयस्कृधि क्षयद्वीराय नमसा विधेम ते ।
यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र
प्रणीतौ ॥४॥ मा नो महान्तमुत मा नो अर्भकं
मा न उक्षन्त मुत मा न उक्षितम् । मा नो वधीः
पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः
॥५॥ मानस्तोके तनये मान आयुषि मा नो गोषु
मा नो अश्वेषु रीरिषः । वीरान्मा नो रुद्र
भामितोऽवधीर्हविष्मन्तो नमसा विधेम ते ॥६॥
आरात्ते गोघ्न उत पूरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते
अस्तु । रक्षा च नो अधि च देव ब्रूह्यधा च नः
शर्म यच्छ द्विबर्हाः ॥७॥ स्तुहि श्रुतं गर्तसदं
युवानं मृगन्न भीम मुपहत्नुमुग्रम् । मृडा जरित्रे
रुद्र स्तवानो अन्यन्ते अस्मन्निवपन्तु सेनाः ॥८॥

परिणो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य

दुर्मतिरघायोः । अव स्थिरा मघवद्भ्यस्तनुश्व

मीढ्वस्तोकाय तनयाय मृडय ॥९॥

मीढुष्टम शिवतम शिवो नः सुमना भव ।

परमे वृक्ष आयुधन्निधाय कृत्तिं वसान

आचर पिनाकं बिभ्रदागहि ॥१०॥

विकिरिद विलोहित नमस्ते अस्तु भगवः ।

यास्ते सहस्रꣳ हेतयोऽन्यमस्मन्निवपन्तु ताः ॥११॥

सहस्राणि सहस्रधा बाहुवोस्तव हेतयः ।

तासामीशानो भगवः पराचीना मुखा कृधि ॥१२॥

अनुवाका ११ (Paragraph 11)

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् ।

तेषाꣳ सहस्र योजनेऽव धन्वानि तन्मसि ॥१॥






अस्मिन् महत्यर्णवेऽन्तरिक्षे भवा अधि ॥२॥

नीलग्रीवाश्शितिकण्ठाः शर्वा अधः, क्षमाचराः ॥३॥

नीलग्रीवाश्शितिकण्ठा दिवꣳ रुद्रा उपश्रिताः ॥४॥

ये वृक्षेषु सस्पिञ्जरा नीलग्रीवा विलोहिताः ॥५॥

ये भूतानामधिपतयो विशिखासः कपर्दिनः ॥६॥

ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ॥७॥

ये पथां पथिरक्षय ऐलबृदा यव्युधः ॥८॥

ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः ॥ ९॥

य एता वन्तश्च भूयाꣳसश्च दिशो रुद्रा वित-स्थिरे ।

तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि ॥१०॥

नमो रुद्रेभ्यो ये पृथिव्यां येऽन्तरिक्षे ये दिवि येषामन्नं
वातो वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश
प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु

ते यं द्विष्मो यश्च नो द्वेष्टि तंवो जम्भे दधामि ॥११ ॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।

ऊर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय

माऽमृतात् ॥

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो

विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु ॥

तमुष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति

भेषजस्य । यक्ष्वामहे सौमनसाय रुद्रं

नमोभिर्देवमसुरं दुवस्य ॥ अयं मे हस्तो

भगवानयं मे भगवत्तरः । अयं मे विश्वभेषजोऽयꣳ

शिवाभिमर्शनः । ये ते सहस्रमयुतं पाशा मृत्यो

मर्त्याय हन्तवे । तान्यज्ञस्य मायया सर्वानव

यजामहे । मृत्यवे स्वाहा मृत्यवे स्वाहा ।

ॐ नमो भगवते रुद्राय विष्णवे मृत्युर्मे पाहि ॥

प्राणानाम् ग्रन्थिरसि रुद्रो मा विशान्तकः ।

तेनान्नेनाप्याय स्व । नमो रुद्राय विष्णवे मृत्युर्मे

पाहि ॥ ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

चमक प्रश्नः (प्रार्थना)

अग्नाविष्णू सजोषसेमावर्द्धन्तु वाङ्गिरः । द्युम्नैर्वाजेभिरागतम् ॥

वाजश्चमे प्रसवश्चमे प्रयतिश्चमे प्रसितिश्चमे धीतिश्चमे क्रतुश्चमे

स्वरश्चमे श्लोकश्चमे श्रावश्चमे श्रुतिश्चमे ज्योतिश्चमे सुवश्चमे

प्राणश्चमेऽपानश्चमे, व्यानश्चमेऽसुश्चमे चित्तञ्चम आधीतञ्चमे वाक्चमे

मनश्चमे चक्षुश्चमे श्रोत्रञ्चमे दक्षश्चमे बलञ्चम ओजश्चमे सहश्चम

आयुश्चमे जराचम आत्माचमे तनूश्चमे शर्मचमे

वर्मचमेऽङ्गानिचमेऽस्थानिचमे परूꣳषिचमे शरीराणिचमे ॥१ ॥

ज्यैष्ठ्यञ्चम आधिपत्यञ्चमे मन्युश्चमे भामश्चमेऽमश्चमेऽम्भश्चमे

जेमाचमे महिमाचमे वरिमाचमे प्रथिमाचमे वर्ष्माचमे द्राघुयाचमे

 

महान्यासम्



वृद्धञ्चमे वृद्धिश्चमे सत्यञ्चमे श्रद्धाचमे जगच्चमे धनञ्चमे वशश्चमे
त्विषिश्चमे क्रीडाचमे मोदश्चमे जातञ्चमे जनिष्यमाणञ्चमे सूक्तञ्चमे
सुकृतञ्चमे वित्तञ्चमे वेद्यञ्चमे भूतञ्चमे भविष्यच्चमे सुगञ्चमे सुपथञ्चम
ऋद्धञ्चम ऋद्धिश्चमे क्लृप्तञ्चमे क्लृप्तिश्चमे मतिश्चमे सुमतिश्चमे ॥२॥

शञ्चमे मयश्चमे प्रियञ्चमेऽनुकामश्चमे कामश्चमे सौमनसश्चमे
भद्रञ्चमे श्रेयश्चमे वस्यश्चमे यशश्चमे भगश्चमे द्रविणञ्चमे
यन्ताचमे धर्ताचमे क्षेमश्चमे धृतिश्चमे विश्वञ्चमे महश्चमे
सव्विँच्चमे ज्ञात्रञ्चमे सूश्चमे प्रसूश्चमे सीरञ्चमे लयश्चम
ऋतञ्चमेऽमृतञ्चमेऽयक्ष्मञ्चमेऽनामयच्चमे जीवातुश्चमे
दीर्घायुत्वञ्चमेऽनमित्रञ्चमेऽभयञ्चमे सुगञ्चमे शयनञ्चमे
सूषाचमे सुदिनञ्चमे .... ॥ ३ ॥

ऊर्क्चमे सूनृताचमे पयश्चमे रसश्चमे घृतञ्चमे मधुचमे सग्धिश्चमे
सपीतिश्चमे कृषिश्चमे वृष्टिश्चमे जैत्रञ्चम औद्भिद्यञ्चमे रयिश्चमे
रायश्चमे पुष्टञ्चमे पुष्टिश्चमे विभुचमे प्रभुचमे बहुचमे भूयश्चमे
पूर्णञ्चमे पूर्णतरञ्चमेऽक्षितिश्चमे कूयवाश्चमेऽन्नञ्चमेऽक्षुच्चमे व्रीहयश्चमे
यवाश्चमे माषाश्चमे तिलाश्चमे मुद्गाश्चमे खल्वाश्चमे गोधूमाश्चमे
मसुराश्चमे प्रियङ्गवश्चमेऽणवश्चमे श्यामकाश्चमे नीवाराश्चमे ॥४॥

अश्माचमे मृत्तिकाचमे गिरयश्चमे पर्वताश्चमे सिकताश्चमे
वनस्पतयश्चमे हिरण्यञ्चमेऽयश्चमे सीसञ्चमे त्रपुश्चमे श्यामञ्चमे
लोहञ्चमेऽग्निश्चम आपश्चमे वीरुधश्चम ओषधयश्चमे
कृष्टपच्यञ्चमेऽकृष्टपच्यञ्चमे ग्राम्याश्चमे पशव आरण्याश्च यज्ञेन
कल्पन्ताव्विँत्तञ्चमे वित्तिश्चमे भूतञ्चमे भूतिश्चमे वसुचमे वसतिश्चमे
कर्मचमे शक्तिश्चमेऽर्थश्चम एमश्चम इतिश्चमे गतिश्चमे

--- ॥५॥

अग्निश्चम इन्द्रश्चमे सोमश्चम इन्द्रश्चमे सविताचम इन्द्रश्चमे
सरस्वतीचम इन्द्रश्चमे पूषाचम इन्द्रश्चमे बृहस्पतिश्चम इन्द्रश्चमे
मित्रश्चम इन्द्रश्चमे वरुणश्चम इन्द्रश्चमे त्वष्टाच म इन्द्रश्चमे
धाताचम इन्द्रश्चमे विष्णुश्चम इन्द्रश्चमेऽश्विनौचम इन्द्रश्चमे
मरुतश्चम इन्द्रश्चमे विश्वेचमे देवा इन्द्रश्चमे पृथिवीचम
इन्द्रश्चमेऽन्तरिक्षञ्चम इन्द्रश्चमे द्यौश्चम इन्द्रश्चमे दिशश्चम इन्द्रश्चमे
मूर्द्धाचम इन्द्रश्चमे प्रजापतिश्चम इन्द्रश्चमे ॥६॥

अꣳशुश्चमे रश्मिश्चमेऽदाभ्यश्चमेऽधिपतिश्चम
उपाꣳशुश्चमेऽन्तर्यामश्चम ऐन्द्रवायश्चमे मैत्रा वरुणश्चम आश्विनश्चमे
प्रतिप्रस्थानश्चमे शुक्रश्चमे मन्थीचम आग्रयणश्चमे वैश्वदेवश्चमे
ध्द्रुवश्चमे वैश्वानरश्चम ऋतुग्रहाश्च मेऽतिग्राह्याश्चम ऐन्द्राग्नश्चमे

वैश्वदेवश्चमे मरुत्वतीयाश्चमे माहेन्द्रश्चम आदित्यश्चमे सावित्रश्चमे
सारस्वतश्चमे पौष्णश्चमे पात्नीवतश्चमे हारियोजनश्चमे ॥७॥

इध्मश्चमे बर्हिश्चमे वेदिश्चमे धिष्णियाश्चमे स्रुचश्चमे चमसाश्चमे
ग्रावाणश्चमे स्वरवश्चम उपरवाश्चमेऽधिषवणेचमे द्रोणकलशश्चमे
वायव्यानिचमे पूतभृच्चम आधवनीयश्चम आग्नीध्रश्चमे हविर्धानश्चमे
गृहाश्चमे सदश्चमे पुरोडाशाश्चमे पचताश्चमेऽवभृथश्चमे
स्वगाकारश्चमे -- ॥८॥

अग्निश्चमे घर्मश्चमेऽर्कश्चमे सूर्यश्चमे प्राणश्चमेऽश्वमेधश्चमे
पृथिवीचमेऽदितिश्चमे दितिश्चमे द्यौश्चमे शक्वरीरङ्गुलयो दिशश्चमे
यज्ञेन कल्पन्तामृक्चमे सामचमे स्तोमश्चमे यजुश्चमे दीक्षाचमे
तपश्चम ऋतुश्चमे व्रतञ्चमेऽहोरात्रयोर्वृष्ट्या बृहद्रथन्तरेचमे यज्ञेन
कल्पेताम् .... ॥९॥

गर्भाश्चमे वत्साश्चमे त्र्यविश्चमे त्र्यवीचमे दित्यवाट्चमे
दित्यौहीचमे पञ्चाविश्चमे पञ्चावीचमे त्रिवत्सश्चमे त्रिवत्साचमे
तुर्यवाट्चमे तुर्यौहीचमे पष्ठवाट्चमे पष्ठौहीचम उक्षाचमे वशाचम
ऋषभश्चमे वेहच्चमेऽनड्वाञ्चमे धेनुश्चम आयुर्यज्ञेन कल्पतां प्राणो
यज्ञेन कल्पतामपानो यज्ञेन कल्पताँव्व्यानो यज्ञेन कल्पताञ्चक्षुर्यज्ञेन
कल्पताꣳ श्रोत्रय्यँज्ञेन कल्पतां मनो यज्ञेन कल्पताँव्वाग्यज्ञेन

  

कल्पतामात्मा यज्ञेन कल्पताय्यँज्ञो यज्ञेन कल्पताम्

-- ॥१० ॥

एकाचमे तिस्रश्चमे पञ्चचमे सप्तचमे नवचम एकादशचमे
त्रयोदशचमे पञ्चदशचमे सप्तदशचमे नवदशचम
एकविꣳशतिश्चमे त्रयोविꣳशतिश्चमे पञ्चविꣳशतिश्चमे
सप्तविꣳशतिश्चमे नवविꣳशतिश्चम एकत्रिꣳशच्चमे त्रयस्त्रिꣳशच्चमे
चतस्रश्चमेऽष्टौचमे द्वादशचमे षोडशचमे विꣳशतिश्चमे
चतुर्विꣳशतिश्चमेऽष्टाविꣳशतिश्चमे द्वात्रिꣳशच्चमे षट्त्रिꣳशच्चमे
चत्वारिꣳशच्चमे चतुश्चत्वारिꣳशच्चमेऽष्टाचत्वारिꣳशच्चमे
वाजश्च प्रसवश्चापिजश्च क्रतुश्च सुवश्च मूर्धाच
व्यश्नियश्चान्त्यायनश्चान्त्यश्च भौवनश्च भुवनश्चाधिपतिश्च ॥११ ॥

ॐ इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानिशꣳसिषद्विश्वे
देवास्सूक्तवाचः पृथिविमातर्मा मा हिꣳसीर्मधु मनिष्ये मधु
जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो
वाचमुद्यासꣳशुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै
पितरोऽनुमदन्तु ॥ ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

 



बिल्वाष्टोत्तरशतस्तोत्रं

ॐ श्री गुरुभ्यो नमः ॥ हरिः ॐ ॥

ॐ अच्युताय नमः । ॐ अनन्ताय नमः । ॐ गोविन्दाय नमः ॥

ॐ गणानान्त्वा गणपतिꣳहवामहे कविङ्कवीनामुपवश्रवस्तमम्
ज्येष्ठराजं ब्रह्मणाम् ब्रह्मणस्पत आनश्शृण्वन्नूतिभिस्सीद सादनम् ॥

ॐ श्री महा गणपतये नमः ॥

ॐ भूः । ॐ भुवः । ॐꣳ सुवः। ॐ महः। ॐ जनः। ॐ तपः।
ॐꣳ सत्यम्। ....

त्रिदळं त्रिगुणाकारं त्रिनेत्रञ्च त्र्यायुधम् ।
त्रिजन्मपापसंहारं एकबिल्वं शिवार्पणम् ॥१॥

त्रिशाखैः बिल्वपत्रैश्च अच्छिद्रैः कोमलैश्शुभैः ।
तव पूजां करिष्यामि एकबिल्वं शिवार्पणम् ॥२॥

सर्वत्रैलोक्यकर्तारं सर्वत्रैलोक्यपालनम् ।
सर्वत्रैलोक्यहर्तारं एकबिल्वं शिवार्पणम् ॥३॥

नागाधिराजवलयं नागहारेण भूषितम् ।
नागकुण्डलसंयुक्तं एकबिल्वं शिवार्पणम् ॥४॥

अक्षमालाधरं रुद्रं पार्वतीप्रियवल्लभम् ।
चन्द्रशेखरमीशानं एकबिल्वं शिवार्पणम् ॥५॥

त्रिलोचनम् दशभुजं दुर्गा देहार्धधारिणम् ।
विभूतिचर्चितं देवं एकबिल्वं शिवार्पणम् ॥६॥

त्रिशूलधारिणं देवं नागाभरणसुन्दरम् ।
चन्द्रशेखरमीशानं एकबिल्वं शिवार्पणम् ॥७॥
गङ्गाधराम्बिकानाथं फणिमण्डलमण्डितम् ।
कालकालं गिरीशञ्च एकबिल्वं शिवार्पणम् ॥८॥
शुद्धस्फटिकसङ्काशं शितिकण्ठं कृपानिधिम् ।
सर्वेश्वरं सदाशान्तं एकबिल्वं शिवार्पणम् ॥९॥
सच्चिदानन्दरूपञ्च परमानन्दमयं शिवम् ।
वागीश्वरं चिदाकाशं एकबिल्वं शिवार्पणम् ॥१०॥
शिपिविष्टं सहस्राक्षं दुन्दुभ्यञ्च निषङ्गिणम् ।
हिरण्यबाहुं सेनान्यं एकबिल्वं शिवार्पणम् ॥११॥
अरुणं वामनं तारं वास्तव्यं चैव वास्तवम् ।
ज्येष्ठं कनिष्ठं वैशन्तं एकबिल्वं शिवार्पणम् ॥१२॥
हरिकेशं वनाधीशं उच्चैर्घोषं सनातनम् ।
अघोररूपकं कुम्भं एकबिल्वं शिवार्पणम् ॥१३॥
कैलासवासिनं भीमं कठोरं त्रिपुरान्तकम् ।
वृषाङ्कं वृषभारूढं एकबिल्वं शिवार्पणम् ॥१४॥
पूर्वजावरजं याम्यं सूक्ष्मतस्करनायकम् ।
नीलकण्ठं जघन्यञ्च एकबिल्वं शिवार्पणम् ॥१४अ॥

सुराश्रयं विषहरं वर्मिणञ्च वरूथिनम् ।
महासेनं महावीरं एकबिल्वं शिवार्पणम् ॥१५॥
कुमारं कुशलं कूप्यं वदान्यञ्च महारथम् ।
पार्यावार्यञ्च दिव्यञ्च एकबिल्वं शिवार्पणम् ॥१६॥
दशकर्णं ललाटाक्षं पञ्चवक्त्रं सदाशिवम् ।
अशेषपापसंहारं एकबिल्वं शिवार्पणम् ॥१७॥
नीलकण्ठं जगद्वन्द्यं दीननाथं महेश्वरम् ।
महापापहरं शम्भुं एकबिल्वं शिवार्पणम् ॥१८॥
चूडामणीकृतविधुं वलयीकृतवासुकिम् ।
कैलासनिलयं भीमं एकबिल्वं शिवार्पणम्॥१९॥
कर्पूरकुन्दधवलं नरकार्णवतारकम् ।
करुणामृतसिन्धुञ्च एकबिल्वं शिवार्पणम्॥२०॥
महादेवं महात्मानं भुजङ्गाधिपकङ्कणम् ।
महापापहरं देवं एकबिल्वं शिवार्पणम् ॥२१॥
भूतेशं खण्डपरशुं वामदेवं पिनाकिनम् ।
वामे शक्तिधरं श्रेष्ठं एकबिल्वं शिवार्पणम् ॥२२॥
फालेक्षणं विरूपाक्षं श्रीकण्ठं भक्तवत्सलम् ।
नीललोहितखट्वाङ्गं एकबिल्वं शिवार्पणम् ॥२३॥
कैलासवासिनं भीमं कठोरं त्रिपुरान्तकम् ।

वृषाङ्कं वृषभारूढं एकबिल्वं शिवार्पणम् ॥२४॥
सामप्रियं स्वरमयं भस्मोद्धूलितविग्रहम् ।
मृत्युञ्जयं लोकनाथं एकबिल्वं शिवार्पणम् ॥२५॥
दारिद्र्यदुःखहरणं रविचन्द्रानलेक्षकम् ।
मृगपाणिं चन्द्रमौलिं एकबिल्वं शिवार्पणम् ॥२६॥
सर्वलोकमयाकारं सर्वलोकैकसाक्षिणम् ।
निर्मलं निर्गुणाकारं एकबिल्वं शिवार्पणम् ॥२७॥
सर्वतत्त्वात्मकं साम्बं सर्वतत्त्वविदूरकम् ।
सर्वतत्त्वस्वरूपञ्च एकबिल्वं शिवार्पणम् ॥२८॥
सर्वलोकगुरुं स्थाणुं सर्वलोकवरप्रदम् ।
सर्वलोकैक नेत्रञ्च एकबिल्वं शिवार्पणम् ॥२९॥
मन्मथोद्धारणं शैवं भवं भर्गं परात्मकम् ।
कमलाप्रियपूज्यञ्च एकबिल्वं शिवार्पणम् ॥३०॥
तेजोमयं महाभीमं स्मरभस्मविलेपनम् ।
भवरोगविनाशञ्च एकबिल्वं शिवार्पणम् ॥३१॥
स्वर्गापवर्गफलदं रघुनाथवरप्रदम् ।
नागराजसुताकान्तं एकबिल्वं शिवार्पणम् ॥३२॥
मञ्जीरपादयुगलं शुभलक्षणलक्षितम् ।

फणिराजविराजञ्च एकबिल्वं शिवार्पणम् ॥३३॥
निरामयं निराधारं निस्सङ्गं निष्प्रपञ्चकम् ।
तेजोरूपं महारौद्रं एकबिल्वं शिवार्पणम् ॥३४॥
चित्राम्बरं चिदाभासं वृषभेश्वरवाहनम् ।
नीलग्रीवं चतुर्वक्त्रं एकबिल्वं शिवार्पणम् ॥३५॥
सर्वलोकैकपितरं सर्वलोकैकमातरम् ।
सर्वलोकैकनाथञ्च एकबिल्वं शिवार्पणम् ॥३६॥
रत्नकञ्चुकरत्नेशं रत्नकुण्डलमण्डितम् ।
नवरत्नकिरीटञ्च एकबिल्वं शिवार्पणम् ॥३७॥
दिव्यरत्नाङ्गुलीकर्णरत्नाभरणभूषितम् ।
नानारत्नं मणिमयं एकबिल्वं शिवार्पणम् ॥३८॥
रत्नाङ्गुलीयविलसत्करशाखाधिकप्रभम् ।
भक्तमानसगेहञ्च एकबिल्वं शिवार्पणम् ॥३९॥
वामाङ्गभागविलसदम्बिकावीक्षणप्रियम् ।
पुण्डरीकनिभाक्षञ्च एकबिल्वं शिवार्पणम् ॥४०॥
सम्पूर्णकामदं सौख्यं भक्तेष्टफलपूरकम् ।
सौभाग्यदं हितकरं एकबिल्वं शिवार्पणम्॥४१॥
नानाशास्त्रगुणोपेतं स्फुरन्मङ्गलविग्रहम् ।
विद्याविभेदरहितं एकबिल्वं शिवार्पणम् ॥४२॥

अप्रमेयगुणाधारं वेदकृद्रूपविग्रहम् ।
धर्माधर्मप्रवृत्तञ्च एकबिल्वं शिवार्पणम् ॥४३॥
गौरीबिलासदनं जीवजीवपितामहम् । कल्पान्तं
भैरवं शुभ्रं एकबिल्वं शिवार्पणम् ॥४४॥
सुखदं सुखनाशञ्च दुःखदं दुःखनाशनम् ।
दुःखावधानं भद्रञ्च एकबिल्वं शिवार्पणम् ॥४५॥
सुखरूपं रूपनाशं सर्वधर्मफलप्रदम् ।
अतीन्द्रियं महामायं एकबिल्वं शिवार्पणम् ॥४६॥
सर्वपक्षिमृगाकारं सर्वपक्षिमृगाधिपम् ।
सर्वपक्षिमृगाधारं एकबिल्वं शिवार्पणम् ॥४७॥
जीवाध्यक्षं जीववर्यं जीवजीवनरक्षकम् ।
जीवकृज्जीवहरणं एकबिल्वं शिवार्पणम् ॥४८॥
विश्वात्मानं विश्ववन्द्यं वज्रात्मवज्रहस्तकम् ।
वज्रेशं वज्रभूषञ्च एकबिल्वं शिवार्पणम् ॥४९॥
गणाधिपं गणाध्यक्षं प्रलयानलनाशकम् ।
दिगम्बरं क्षोभनाशं एकबिल्वं शिवार्पणम् ॥५०॥
त्रयम्बकं मृडं शूलमरिष्टवर्गनाशकम् ।
जितेन्द्रियं वीरभद्रं एकबिल्वं शिवार्पणम् ॥५१॥

कुन्देन्दुशङ्खधवलं भगनेत्राभिदुज्ज्वलम् ।
कालाग्निरुद्रं सर्वज्ञं एकबिल्वं शिवार्पणम् ॥५२॥
कम्बुग्रीवं कम्बुकण्ठं धैर्यदं धैर्यवर्धकम् ।
शार्दूलचर्मवसनं एकबिल्वं शिवार्पणम् ॥५३॥
जगदुत्पत्तिहेतुञ्च जगत्प्रलयकारणम् ।
पूर्णानन्दस्वरूपञ्च एकबिल्वं शिवार्पणम् ॥५४॥
स्वर्णकेशं महत्तेजः पुण्यश्रवणकीर्तनम् ।
ब्रह्माण्डनायकं तारं एकबिल्वं शिवार्पणम् ॥५५॥
मन्दारमूलनिलयं मन्दारकुसुमप्रियम् ।
वृन्दारकप्रियतरं एकबिल्वं शिवार्पणम् ॥५६॥
महेन्द्रियं महाबाहुं विश्वासपरिपूरकम् ।
सुलभासुलभं लभ्यं एकबिल्वं शिवार्पणम् ॥५७॥
बीजाधारं बीजरूपं निर्बीजं बीजवृद्धिदम् ।
परेशं बीज नाशञ्च एकबिल्वं शिवार्पणम् ॥५८॥
युगाधारं युगाधीशं युगकृद्युगनाशकम् ।
युगेशं युगनाशञ्च एकबिल्वं शिवार्पणम् ॥५९॥
धूर्जटिं पिङ्गलजटं जटामण्डलमण्डितम् ।
कर्पूरगौरं गौरीशं एकबिल्वं शिवार्पणम् ॥६०॥

सुरावासं जनावासं योगीशं योगिपुङ्गवम् ।
योगदं योगिनां सिम्हं एकबिल्वं शिवार्पणम्
॥६१॥ उत्तमानुत्तमं तत्वमन्धकासुरसूदनम् ।
भक्तकल्पद्रुमं स्तव्यं एकबिल्वं शिवार्पणम् ॥६२॥
विचित्रमाल्यवसनं दिव्यचद्नचर्चितम् ।
विष्णुब्रह्मादिवन्द्यञ्च एकबिल्वं शिवार्पणम् ॥६३॥
कुमारंपितरं देवं सितचन्द्रकलानिधिम् ।
ब्रह्मशत्रुं जगन्मित्रं एकबिल्वं शिवार्पणम् ॥६४॥
लावण्यमधुराकारं करुणारसवारिधिम् ।
भ्रुवोर्मध्ये सहस्रार्चिं एकबिल्वं शिवार्पणम् ॥६५॥
जटाधरं पावकाक्षमृक्षेशं भुवनाश्रयम् ।
कामदं सर्वदागम्यं एकबिल्वं शिवार्पणम् ॥६६॥
शिवं शान्तमुमानाथं महाध्यानपरायणम् ।
ज्ञानप्रदं कृत्तिवासं एकबिल्वं शिवार्पणम् ॥६७॥
वासुक्युरगहारञ्च लोकानुग्रहकारणम् ।
ज्ञानप्रदं कृत्तिधरं एकबिल्वं शिवार्पणम् ॥६८॥
शशाङ्कधारिणं भर्गं सर्वलोकैकशङ्करम् ।
शुद्धश्चं शाश्वतं नित्यं एकबिल्वं शिवार्पणम् ॥६९॥






शरणागतदीनार्तपरित्राणपरायणम् ।
गम्भीरञ्च वषट्कारं एकबिल्वं शिवार्पणम् ॥७०॥
भोक्तारं भोजनं भोज्यं जेतारं जितमानसम् ।
करणं कारणं जिष्णुं एकबिल्वं शिवार्पणम् ॥७१॥
क्षेत्रज्ञं क्षेत्रपालञ्च परार्थैकप्रयोजनम् ।
व्योमकेशं भीमवेषं एकबिल्वं शिवार्पणम् ॥७२॥
भाविजं तरुणोपेतं क्षेमदिष्ट्यमशासकम् ।
हिरण्यगर्भं हेमाङ्गं एकबिल्वं शिवार्पणम् ॥७३॥
दक्षञ्चामुण्डाजनकं मोक्षदं मोक्षदायकम् ।
हिरण्यदं हेमरूपं एकबिल्वं शिवार्पणम् ॥७४॥
महाश्मशाननिलयं प्रसन्नस्फटिकप्रभुम् ।
वेदाश्वं वेदरूपञ्च एकबिल्वं शिवार्पणम् ॥७५॥
स्थिरं स्वधर्ममानाभं ब्रह्मण्यं चाश्रयं विभुम् ।
जगन्निवासं प्रथमं एकबिल्वं शिवार्पणम् ॥७६॥
रुद्राक्षमालाभरणं रुद्राक्षप्रियवत्सलम् ।
रुद्राक्षभक्तसंस्तव्यं एकबिल्वं शिवार्पणम् ॥७७॥
फणीन्द्रविलसत्कण्ठंफणीन्द्रवलयान्वितम् ।
मुनिवन्द्यं मुनिश्रेष्ठं एकबिल्वं शिवार्पणम् ॥७८॥
नागेन्द्रविलसत्कर्णं भुजङ्गाभरणप्रियम् ।

दक्षाध्वरविनाशञ्च एकबिल्वं शिवार्पणम् ॥७९॥

मृगेन्द्रचर्मवसनं मुनिसाध्यैकजीवनम् ।

सर्वदेवादिपूज्यञ्च एकबिल्वं शिवार्पणम् ॥८०॥

निधनेशं धनाधीशमपमृत्युविनाशनम् ।

लिङ्गमूर्तिमलिङ्गाख्यं एकबिल्वं शिवार्पणम् ॥८१॥

भक्तकल्याणदं व्यस्तं वेदवेदान्तसंस्तुतम् ।

कल्पकृत्कल्पनाशञ्च एकबिल्वं शिवार्पणम् ॥८२॥

घोरपातकदावाग्निं जन्मकर्मविवर्जितम् ।

कपालमालाभरणं एकबिल्वं शिवार्पणम् ॥८३॥

मातङ्गचर्मवसनं विराड्रूपविधारकम् ।

विष्णुक्रान्तमनन्तञ्च एकबिल्वं शिवार्पणम् ॥८४॥

यज्ञकर्मफलाध्यक्षं यज्ञविघ्नविनाशकम् ।

यज्ञेशं यज्ञभोक्तारं एकबिल्वं शिवार्पणम् ॥८५॥

कालाधीशं त्रिकालज्ञं दुष्टनिग्रहकारकम् ।

योगिमानसपूज्यञ्च एकबिल्वं शिवार्पणम् ॥८६॥

महोन्नासं महाकायं महोदरं महाभुजम् ।

महावृत्तं महावक्त्रं एकबिल्वं शिवार्पणम् ॥८७॥

सुनेत्रं सुललाटञ्च शर्वं भीमपराक्रमम् ।






महेश्वरं शिवकरं एकबिल्वं शिवार्पणम् ॥८८॥

समस्तजगदाधारं समस्तगुणसागरम् ।

सत्यं सत्यगुणोपेतं एकबिल्वं शिवार्पणम् ॥८९॥

माघकृष्णचतुर्दश्यां पूजार्थञ्च जगद्गुरोः ।

दुर्लभं सर्वदेवानां एकबिल्वं शिवार्पणम् ॥९०॥

तत्रापि दुर्लभं मन्ये नभो मासेन्दुवासरे ।

प्रदोषकाले पूजा च एकबिल्वं शिवार्पणम् ॥९१॥

सालग्रामेषु विप्राणां तटाकशतकूपयोः ।

कोटिकन्यामहादानं एकबिल्वं शिवार्पणम् ॥९२॥

दर्शनं बिल्ववृक्षस्य स्पर्शनं पापनाशनम् ।

अघोर पापसंहारं एकबिल्वं शिवार्पणम् ॥९३॥

तुलसी नीलनिर्गुण्ठां जम्बीरामलकं तथा ।

अघोरपापसंहारं एकबिल्वं शिवार्पणम् ॥९४॥

अखण्डबिल्वपत्रैश्च पूजयेन्नन्दिकेश्वरम् ।

मुच्यते सर्वपापेभ्यः एकबिल्वं शिवार्पणम् ॥९५॥

सालङ्कृतं सतां वृन्ते कन्याकोटिसहस्रकम् ।

साम्राज्यपृथिवीदानञ्च एकबिल्वं शिवार्पणम् ॥९६॥

दशकोटितुरङ्गाणामश्वमेधसहस्रकम् ।






साम्राज्यपृथिवीदानं एकबिल्वं शिवार्पणम् ॥९७॥
चतुर्वेदसहस्राणि भारतादिपुराणकम् ।
तुलाभारं शतावृत्तिं एकबिल्वं शिवार्पणम् ॥९८॥
सर्वरत्नमयं मेरुं काञ्चनं दिव्यवस्त्रकम् ।
सवत्सधेनुकोटीनाम् एकबिल्वं शिवार्पणम् ॥९९॥
अष्टोत्तरशतं बिल्वं योऽर्पयेल्लिङ्गमस्तके ।
अथर्वोक्तं वदेद्यः स एकबिल्वं शिवार्पणम् ॥१००॥
काशीक्षेत्रनिवासञ्च कालभैरवदर्शनम् ।
अघोरपापसंहारं एकबिल्वं शिवार्पणम् ॥१०१॥
अष्टोत्तरशतश्लोकैः स्तोत्राद्यैः पूजयेद्यदा ।
त्रिसन्ध्यं मोक्षमाप्नोति एकबिल्वं शिवार्पणम् ॥१०२॥
दन्तिकोटिसहस्राणां भूहिरण्यसहस्रकम् ।
सर्वक्रतुमयं पुण्यम् एकबिल्वं शिवार्पणम् ॥१०३॥
पुत्रपौत्रादिकं भोगं भुक्त्वा चात्र यथेप्सितम् ।
अन्ते च शिवसायुज्यं एकबिल्वं शिवार्पणम् ॥१०४॥
विप्रकोटिसहस्राणां भक्तगानाञ्च यत्फलम् ।
तत्फलं प्राप्नुयात् सत्यं एकबिल्वं शिवार्पणम् ॥१०५॥
शिवनामकीर्तनं यश्च शिवपादाम्बु यः पिबेत् ।
जीवन्मुक्तो भवत् सत्यं एकबिल्वं शिवार्पणम् ॥१०६॥






अनेकदानफलदं अनन्तसुकृतार्पकम् ।
तीर्थयात्राखिलं पुण्यम् एकबिल्वं शिवार्पणम् ॥१०७॥
त्वं मां पालय सर्वत्र पदध्यानकृतं तव ।
पावनं शाङ्करं नित्यं एकबिल्वं शिवार्पणम् ॥१०८॥
एककाले पठेन्नित्यं सर्वशत्रुनिवारणम् ।
द्विकाले च पठेन्नित्यं एकबिल्वं शिवार्पणम् ॥१०९॥
त्रिकाले च पठेन्नित्यं मनोवाञ्छाफलप्रदम् ।
अचिरात् कार्यसिद्धिश्च लभते नात्र संशयः ॥११०॥
एककालं द्विकालं वा त्रिकालं यः पठेन्नरः ।
लक्ष्मीप्राप्तिः शिवावासः शिवेन सह मोदते ॥१११॥
कोटिजन्मकृतं पापं अर्चनेन विनश्यति ।
सप्तजन्मकृतं पापं श्रवणेन विनश्यति ॥११२॥
जन्मान्तरकृतं पापं पठनेन विनश्यति ।
दिवारात्रिकृतं पापं दर्शनेन विनश्यति ॥११३॥
क्षणे क्षणे कृतं पापं स्मरणेन विनश्यति ।
पुस्तकं धारयेद्देहे आरोग्यं भयनाशकम् ॥११४॥
त्रयोदशोत्तरशत श्लोकैः सङ्घटितं वरम् ।
एकबिल्वार्पणस्तोत्रं यः पठेत् शिवसन्निधौ ॥११५॥






स सर्वसिद्धिमाप्नोति आयुः कीर्तिं च विन्दति ।
सर्वैः संपूज्यते लोके शिवलोके महीयते ॥११६॥
अष्टम्यां सोमवारे च प्रदोषशिवरात्रिषु ।
आर्द्रायां गुरुवारे च त्रिदळैः बिल्वपत्रकैः ॥११७॥
अष्टोत्तरशतं कार्यं अर्चनं शिवमस्तके ।
तेन स्वर्गमवाप्नोति शिवसायुज्यमाप्नुयात् ॥११८॥

इति श्री शिवरहस्ये गौरीनारायण संवादे बिल्वाष्टोत्तरशतस्तोत्रं सम्पूर्णम् ।

ॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐ

शिवमानसपूजा

(श्रीमच्छङ्कराचार्यविरचिता)

रत्नैः कल्पितमासनं हिमजलैः स्नानं च दिव्याम्बरं
नानारत्नविभूषितं मृगमदामोदाङ्कितं चन्दनम् ।
जातीचम्पकबिल्वपत्ररचितं पुष्पं च धूपं तथा दीपं
देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम् ॥१॥
सौवर्णे नवरत्नखण्डरचिते पात्रे घृतं पायसं
भक्ष्यं पञ्चविधं पयोदधियुतं रम्भाफलं पानकम् ।
शाकानामयुतं जलं रुचिकरं कर्पूरखण्डोज्ज्वलं

ताम्बूलं मनसा मया विरचितं भक्त्या प्रभो
स्वीकुरु ॥२॥

छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलं
वीणाभेरिमृदङ्ग-काहलकला गीतं च नृत्यं तथा ।
साष्टाङ्गं प्रणतिः स्तुतिर्बहुविधा ह्येतत्समस्तं मया
सङ्कल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो
॥३॥

आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः
शरीरं गृहं पूजा ते विषयोपभोगरचना निद्रा
समाधिस्थितिः ।
सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा
गिरो यद्यत्कर्म करोमि तत्तदखिलं शम्भो
तवाराधनम् ॥४॥

करचरणकृतं वाक्कायजं कर्मजं वा
श्रवणनयनजं वा मानसं वापराधम् ।
विहितमविहितं वा सर्वमेतत्क्षमस्व जय जय
करुणाब्धे श्रीमहादेव शम्भो ॥५॥

ॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐ

॥ ॐ श्री महा गणपतये नमः ॥

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुस्साक्षात् परंब्रह्म तस्मै श्रीगुरवे नमः ॥
ऐंकार-ह्रींकार-रहस्ययुक्त-श्रींकारगूढार्थ-महाविभूत्या ।
ॐकारमर्म-प्रतिपादिनीभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥
सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लम्बोदरश्च विकटो विघ्नराजो गणादिपः ॥
धूमकेतुर्गणाध्यक्षो फालचन्द्रो गजाननः ।
वक्रतुण्डः शूर्पकर्णो हेरम्बः स्कन्द्रपूर्वजः ।
षोडशैतानि नामानि यः पठेत् श्रुणुयादपि
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
सङ्ग्रामे सर्वकार्येषु विघ्नस्तस्य न जायते ॥

स्कन्द्र उवाच ।

योगिश्वरो महासेनः कार्तिकेयोऽअग्निनन्द्रनः ।
स्कन्द्रः कुमारः सेनानीः स्वामी शङ्करसम्भवः ॥१॥
गाङ्गेयस्ताम्रचूडश्च ब्रह्मचारी शिखिध्वजः ।
तारकारिरुमापुत्रः क्रौञ्चारिश्च षडाननः ॥२॥
शद्बब्रह्मसमुद्रश्च सिद्धः सारस्वतो गुहः ।
सनत्कुमारो भगवान् भोग मोक्षफलप्रदः ॥३॥
शरजन्मा गणाधीशपूर्वजो मुक्तिमार्गकृत् ।

सर्वागमदप्रणेता च वाञ्छितार्थप्रदर्शनः ॥४॥
अष्टाविंशतिनामानि मदीयानीतियः पठेत् ।
प्रत्यूशं श्रद्धया युक्तो मूको वाचस्पतिर्भवेत् ॥५॥
महामन्त्रमयानीति मम नामानु कीर्तनम् ।
महाप्रज्ञामवाप्नोति नात्र कार्या विचारणा ॥६॥

इति श्री रुद्रयामळे प्रज्ञाविवर्धनाख्यं श्रीमत्कार्तिकेय स्तोत्रं सम्पूर्णम् ॥

शुक्लाम्बरधरं विश्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवधनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

ॐ कलाभ्यां चूडालंकृत-शशिकलाभ्यां निजतपः
फलाभ्यां भक्तेषु प्रकटित-फलाभ्यां भवतु मे ।
शिवाभ्या-मस्तोक-त्रिभुवन-शिवाभ्यां हृदि
पुर्नभवाभ्या-मानद्ब-स्फुर-दनुभवाभ्यां नतिरियम्
॥१॥
गलन्ती शंभो त्वच्चरित-सरितः किल्बिषरजो
दलन्ती धीकुल्यासरणिषु पतन्ती विजयताम् ।
दिशन्ती संसारभ्रमण-परितापोपशमनं वसन्ती
मच्चेतो-हृदभुवि *शिवानद्बलहरी* ॥२॥
त्रयीवेद्यं हृद्यं त्रिपुरहरमाद्यं त्रिनयनं
जटा-भारोदारं चलदुरगहारं मृगधरम् ।

महादेवं देवं मयि सदयभावं पशुपतिं चिदालंबं
सांबं शिवमतिविडंबं हृदि भजे ॥३॥
सहस्रं वर्तन्ते जगति विबुधाः क्षुद्रफलदा
न मन्ये स्वप्ने वा तदनुसरणं तत्कृतफलम् ।
हरि-ब्रह्मादीनामपि निकटभाजा-मसुलभं चिरं
याचे शंभो शिव तव पदांभोज-भजनम् ॥४॥
स्मृतौ शास्त्रे वैद्ये शकुन-कविता-गान-फणितौ
पुराणे मन्त्रे वा स्तुति-नटन-हास्येश्वचतुरः ।
कथं राज्ञां प्रीतिर्भवति मयि कोऽहं पशुपते पशुं
मां सर्वज्ञ प्रथित कृपया पालय विभो ॥५॥
घटो वा मृत्पिण्डोऽप्यणुरपि च धूमोग्नि-रचलः
पटो वा तन्तुर्वा परिहरति किं घोरशमनम् ।
वृथा कण्ठक्षोभं वहसि तरसा तर्कवचसा
पदांभोजं शंभो-र्भज परमसौख्यं व्रज सुधीः ॥६॥
मनस्ते पादाब्जे निवसतु वचःस्तोत्र-फणितौ
करौचाभ्यर्चायां श्रुतिरपि कथाकर्णन-विधौ ।
तव ध्याने बुद्धि-र्नयन-युगलं मूर्ति-विभवे
परग्रन्थान् कैर्वा परमशिव जाने परमतः ॥७॥

यथा बुद्धिश्शुक्तौ रजतमिति काचाश्मनि मणिर्जले
पैष्टे क्षीरं भवति मृगतृष्णासु सलिलम् ।
तथा देव-भ्रान्त्या भजति भवदन्यं जडजनो
महादेवेशं त्वां मनसि च न मत्वा पशुपते ॥८॥
गभीरे कासारे विशति विजने घोरविपिने
विशाले शैले च भ्रमति कुसुमार्थं जडमतिः ।
समर्प्यैकं चेतस्सरसिज-मुमानाथ भवते
सुखेनावस्थातुं जन इह न जानाति किमहो ॥९॥
नरत्वं देवत्वं नग-वन-मृगत्वं मशकता पशुत्वं
कीटत्वं भवतु विहगत्वादि जननम् ।
सदा त्वत्पादाब्ज-स्मरण-परमानन्द-लहरी
विहारासक्तं चे द्धृदय-मिह किं तेन वपुषा ॥१०॥
वटुर्वा गेही वा यतिरपि जटी वा तदितरो नरो
वा यः कश्चिद्भवतु भव किं तेन भवति ।
यदीयं हृत्पद्मं यदि भवदधीनं पशुपते तदीय-स्त्वं
शंभो भवसि भवभारं च वहसि ॥११॥
गुहायां गेहे वा बहिरपि वने वाऽद्रिशिखरे जले
वा वह्नौ वा वसतु वसतेः किं वद फलम् ।
सदा यस्यैवान्तः करण-मपि शंभो तव पदे






स्थितं चेद्योगोऽसौ स च परम-योगी स च
सुखी ॥१२॥

असारे संसारे निजभजन-दूरे जडधिया भ्रमन्तं
मामन्धं परम-कृपया पातु-मुचितम् । मदन्यः
को दीन-स्तव कृपण-रक्षाति-निपुण-स्तवदन्यः
को वा मे त्रिजगति शरण्यः पशुपते ॥१३॥

प्रभु-स्त्वं दीनानां खलु परमबन्धुः पशुपते
प्रमुख्योऽहं तेषा-मपि किमुत बन्धुत्व-मनयोः ।
त्वयैव क्षन्तव्या-शिशव मदपराधाश्च सकलाः
प्रयत्नात्कर्तव्यं मदवन-मियं बन्धु-सरणिः ॥१४॥

उपेक्षा नो चेत् किन्न हरसि भवद्-ध्यान-विमुखां
दुराशा-भूयिष्ठां विधि-लिपि-मशक्तो यदि भवान् ।
शिर-स्तद्वैधात्रं न नखलु सुवृत्तं पशुपते कथं वा
निर्यत्नं करनख-मुखेनैव लुलितम् ॥१५॥

विरिञ्चि-र्दीर्घायु-र्भवतु भवता तत्परशिरश्चतुष्कं
संरक्ष्यं स खलु भुवि दैन्यं लिखितवान्। विचारः
को वा मां विशद कृपया पाति शिव ते
कटाक्ष-व्यापारः स्वयमपि च दीनावन-परः ॥१६॥






फलाद्वा पुण्यानां मयि करुणया वा त्वयि विभो
प्रसन्नेऽपि स्वस्मिन् भवदमल-पादाब्ज-युगलम् ।
कथं पश्येयं मां स्थगयति नमस्संभ्रम-जुषां
निलिंपानां श्रेणि-र्निज-कनक-माणिक्य-मकुटैः ॥१७॥

त्वमेको लोकानां परमफलदो दिव्य-पदवीं वहन्त-
स्त्वन्मूलां पुनरपि भजन्ते हरिमुखाः ।
कियद्वा दाक्षिण्यं तव शिव मदाशा च कियती
कदा वा मद्रक्षां वहसि करुणा-पूरित-दृशा ॥१८॥

दुराशा-भूयिष्ठे दुरधिपभगृहद्वार-घटके दुरन्ते संसारे
दुरित-निलये दुःखजनके । मदायासं किं न
व्यपनयसि कस्योपकृतये वदेयं प्रीतिश्चेत्
त्व शिव कृतार्थाः खलु वयम् ॥१९॥

सदा मोहाटव्यां चरति युवतीनां कुच-गिरौ
नट-त्याशा-शाखा-स्वटति जटति स्वैरमभितः ।
कपालिन् भिक्षो मे हृदय-कपि-मत्यन्त-चपलं दृढं
भक्त्या बध्द्वा शिव भवदधीनं कुरु विभो ॥२०॥

धृति-स्तंभाधारां दृढगुण-निबद्धां सगमनां विचित्रां
पद्माढ्यां प्रति-दिवस-सन्मार्ग-घटिताम् । स्मरारे

मच्चेतः-स्फुट-पट-कुटीं प्राप्य विशदां जय स्वामिन्
शक्त्या सह शिवगणै-स्सेवित विभो ॥२१॥
प्रलोभाद्यै-रर्थाहरण-परतन्त्रो धनि-गृहे
प्रवेशोद्युक्तस्सन् भ्रमति बहुधा तस्करपते । इमं
चेतश्चोरं कथ-मिह सहे शङ्कर विभो तवाधीनं
कृत्वा मयि निरपराधे कुरु कृपाम् ॥२२॥
करोमि त्वत्पूजां सपदि सुखदो मे भव विभो
विधित्वं विष्णुत्वं दिशसि खलु तस्याः
फलमिति। पुनश्च त्वां द्रष्टुं दिवि भुवि वहन्
पक्षिमृगता-मद्रष्ट्वा तत्खेदं कथमिह सहे शङ्कर
विभो ॥२३॥
कदा वा कैलासे कनकमणिसौधे सहगणै-र्वसन्
शंभोरग्रे स्फुट-घटित-मूर्धाञ्जलिपुटः । विभो सांबः
स्वामिन् परमशिव पाहीति निगदन् विधातॄणां
कल्पान् क्षणमिव विनेष्यामि सुखतः ॥२४॥
स्तवै-र्ब्रह्मादीनां जय-जय-वचोभि-र्नियमिनां गणानां
केलीभि-र्मदकल-महोक्षस्य ककुदि । स्थितं
नीलग्रीवं त्रिणयन-मुमाश्लिष्ट-वपुषं कदा त्वां

पश्येयं करधृत-मृगं खण्डपरशुम् ॥२५॥
कदा वा त्वां दृष्ट्वा गिरिश तव भव्याङ्घ्रियुगलं
गृहीत्वा हस्ताभ्यां शिरसि नयने वक्षसि वहन् ।
समाश्लिष्याघ्राय स्फुट-जलज-गन्धान् परिमला-
नलभ्यां ब्रह्माद्यै-र्मुद-मनुभविष्यामि हृदये ॥२६॥
करस्थे हेमाद्रौ गिरिश निकटस्थे धनपतौ गृहस्थे
स्वर्भूजामर-सुरभि-चिन्तामणिगणे । शिरस्थे
शीतांशौ चरण-युगलस्थेऽखिलशुभे कमर्थं
दास्येऽहं भवतु भवदर्थं मम मनः ॥२७॥
सारूप्यं तव पूजने शिव महादेवेति सङ्कीर्तने
सामीप्यं शिवभक्ति-धुर्य-जनता-साङ्गत्य संभाषणे ।
सालोक्यं च चराचरात्मक-तनु-र्ध्याने भवानीपते
सायुज्यं मम सिद्ध-मन्त्र भवति स्वामिन्
कृतार्थोस्म्यहम् ॥२८॥
त्वत्पादांबुज-मर्चयामि परमं त्वां चिन्तयाम्यन्वहं
त्वामीशं शरणं व्रजामि वचसा त्वामेव याचे
विभो । वीक्षां मे दिश चाक्षुषीं सकरुणां दिव्यै-
श्चिरं प्रार्थितां शंभो लोकगुरो मदीयमनस-

स्सौख्योपदेशं कुरु ॥२९॥

वस्त्रोद्धृतविधो सहस्रकरता पुष्पार्चने विष्णुता गन्धे गन्धवहात्मताऽन्नपचने बर्हिर्मुखाध्यक्षता । पात्रे काञ्चनगर्भतास्ति मयि चेद्बालेन्दुचूडामणे शुश्रूषां करवाणि ते पशुपते स्वामिन् त्रिलोकीगुरो ॥३०॥

नालं वा परमोपकारक-मिदं त्वेकं पशूनां पते पश्यन् कुक्षिगतान् चराचरगणान् बाह्यस्थितान् रक्षितुम् । सर्वामर्त्य-पलायनौषध-मितिज्वालाकरं भीकरं निक्षिप्तं गरलं गले न गिलितं नोद्गीर्ण-मेव त्वया ॥३१॥

ज्वालोग्र-स्सकलामराति-भयदः क्ष्वेलः कथं वा त्वया दृष्टः किञ्च करे धृतः करतले किं पक्व-जंबूफलम् । जिह्वायां निहितश्च सिद्धघुटिका वा कण्ठदेशे भृतः किं ते नीलमणि-र्विभूषण-मयं शंभो महात्मन् वद ॥३२॥

नालं वा सकृदेव देव भवत-स्सेवा नतिर्वा नुतिः पूजा वा स्मरणं कथाश्रवण-मप्यालोकनं मादृशाम् । स्वामिन्नस्थिर-देवतानुसरणयासेन






किं लभ्यते का वा मुक्ति-रितः कुतो
भवति चेत् किं प्रार्थनीयं सदा ॥३३॥
किं ब्रूम-स्तव साहसं पशुपते कस्यास्ति शंभो
भवद्धैर्यञ्चदृश-मात्मनःस्थिति-रियं चान्यैः कथं
लभ्यते । भ्रश्यद्देवगणं त्रसन्मुनिगणं
नश्यत्प्रपञ्चं लयं पश्यन्निर्भय एक एव
विहरत्यानन्द-सान्द्रो भवान् ॥३४॥
योगक्षेम-धुरंधरस्य सकलः-श्रेयः-प्रदोद्योगिनो
दृष्टादृष्ट-मतोपदेशकृतिनो ब्राह्यान्तर-व्यापिनः ।
सर्वज्ञस्य दयाकरस्य भवतः किं वेदितव्यं
मया शंभो त्वं परमान्तरङ्ग इति मे चित्ते
स्मराम्यन्वहम् ॥३५॥
भक्तो भक्तिगुणावृते मुदमृतापूर्णे प्रसन्ने मनः-कुंभे
सांब तवाङ्घ्रिपल्लवयुगं संस्थाप्य संवित्फलम् ।
सत्वं मन्त्र-मुदीरय-न्निजशरीरागार-शुद्धिं वहन्
पुण्याहं प्रकटीकरोमि रुचिरं कल्याण-मापादयन्
॥३६॥
आम्नायांबुधि-मादरेण सुमन-स्सङ्घा-स्समुद्यन्मनो

मन्थानं दृढभक्ति-रज्जु-सहितं कृत्वा मथित्वा ततः।
सोमं कल्पतरुं सुपर्व-सुरभिं चिन्तामणिं धीमतां
नित्यानन्द-सुधां निरन्तर-रमा-सौभाग्य-मातन्वते
॥३७॥

प्राक्पुण्याचल-मार्गदर्शित-सुधामूर्तिः प्रसन्नशिवः
सोमस्सद्गुण-सेवितो मृगधरः पूर्णस्तमो-मोचकः ।
चेतः पुष्कर-लक्षितो भवति चेदानन्दपाथो-निधिः
प्रागल्भ्येन विजृंभते सुमनसां वृत्तिस्तदा जायते
॥३८॥

धर्मो मे चतुरङ्घ्रिक-स्सुचरितः पापं विनाशं गतं
काम-क्रोध-मदादयो विगलिताः कालाः
सुखाविष्कृताः । ज्ञानानन्द-महौषधिः सुफलिता
कैवल्यनाथे सदा मान्ये मानसपुण्डरीक-नगरे
राजावतम्से स्थिते ॥३९॥

धीयन्त्रेण वचोघटेन कविता-कुल्योपकुल्याक्रमै-
रानीतैश्च सदाशिवस्य चरितांभोराशि-दिव्यामृतैः।
हृत्केदार-युताश्च भक्तिकलमाः साफल्य-मातन्वते
दुर्भिक्षान्मम सेवकस्य भगवन् विश्वेश






भीतिः कुतः ॥४०॥

पापोत्पात-विमोचनाय रुचिरैश्वर्याय मृत्युञ्जय स्तोत्र-ध्यान-नति-प्रदक्षिण-सपर्यालोकनाकर्णने । जिह्वा-चित्त-शिरोऽङ्घ्रि-हस्त-नयन-श्रोत्रैरहं प्रार्थितो मामाज्ञापय तन्निरूपय मुहु-र्मामेव मा मेऽवचः ॥४१॥ गांभीर्यं परिखापदं घनधृतिः प्राकारउद्यद्गुणस्तोमश्चाप्तबलं घनेन्द्रियचयो द्वाराणि देहे स्थितः । विद्या वस्तु-समृद्धिरित्यखिल-सामग्री-समेते सदा दुर्गातिप्रिय-देव मामक-मनो-दुर्गे निवासं कुरु ॥४२॥

मा गच्छ त्व-मितस्ततो गिरिश भो मय्येव वासं कुरु स्वामिन्नादिकिरात मामकमनः कान्तार-सीमान्तरे । वर्तन्ते बहुशो मृगा मदजुषो मात्सर्य-मोहादय-स्तान् हत्वा मृगया-विनोद-रुचितालाभं च संप्राप्स्यसि ॥४३॥

करलग्नमृगः करीन्द्र-भङ्गो घनशार्दूल-विखण्डनोऽस्त-जन्तुः । गिरिशो विशदाकृतिश्च चेतः कुहरे पञ्चमुखोस्ति मे कुतो भीः ॥४४॥

छद्रश्शाखि-शिखान्वितै-र्द्विजवरै-स्संसेविते शाश्वते
सौख्यापादिनि खेदभेदिनि सुधासारैः फलै-र्दीपिते ।
चेतः पक्षिशिखामणे त्यज वृथा-सञ्चार-मन्यै-रलं
नित्यं शङ्कर-पादपद्म-युगली-नीडे विहारं कुरु
॥४५॥ आकीर्णे नखराजिकान्ति-विभवै-
रुद्यत्सुधा-वैभवै-राद्यौतेपि च पद्मराग-ललिते
हंसव्रजै-राश्रिते । नित्यं भक्तिवधूगणैश्च
रहसि स्वेच्छा-विहारं कुरु स्थित्वा
मानस-राजहंस गिरिजानाथाङ्घ्रि-सौधान्तरे ॥४६॥
शंभुध्यान-वसन्त-सङ्गिनि हृदारामेऽघजीर्णच्छदाः
स्रस्ता भक्ति-लताच्छटा विलसिताः पुण्यप्रवाल-
श्रिताः । दीप्यन्ते गुणकोरका जपवचः पुष्पाणि
सद्वासना ज्ञानानन्द-सुधा-मरन्द-लहरी
संवित्फलाभ्युन्नतिः ॥४७॥
नित्यानन्द-रसालयं सुरमुनि-स्वान्तांबु-जाताश्रयं
स्वच्छं सद्द्विज-सेवितं कलुषहृत्-सद्वासनाविष्कृतम् ।
शंभुध्यान-सरोवरं व्रज मनो हंसावतंस-स्थिरं किं
क्षुद्राश्रय-पल्वल-भ्रमण-सञ्जात श्रमं प्राप्स्यसि ॥४८॥
आनन्दामृत-पूरिता हरपदांभोजालवालोद्यता

स्थैर्योपन्न-मुपेत्य भक्ति-लतिका शाखोपशाखान्विता ।
उच्छे-र्मानस-कायमान-पटली-माक्रम्य निष्कल्मषा
नित्याभीष्ट-फलप्रदा भवतु मे सत्कर्म-संवर्धिता ॥४९॥
सन्ध्यारंभ-विजृंभितं श्रुतिशिरस्थानान्त-राधिष्ठितं
सप्रेम-भ्रमराभिराम-मसकृत् सद्वासना-शोभितम् ।
भोगीन्द्राभरणं समस्त-सुमनः-पूज्यं गुणाविष्कृतं
सेवे श्रीगिरि-मल्लिकार्जुन-महालिङ्गं
शिवालिङ्गितम् ॥५०॥
भृङ्गीच्छा-नटनोत्कटःकरिमदग्राही स्फुरन्माधवा-ह्लादो
नादयुतो महासितवपुः पञ्चेषुणा चादृतः ।
सत्पक्ष-स्सुमनो-वनेषु स पुनः साक्षान्मदीये मनो
राजीवे भ्रमराधिपो विहरतां श्रीशैलवासी विभुः
॥५१॥ कारुण्यामृत-वर्षिणं घनविपद्-
ग्रीष्मच्छिदा-कर्मठं विद्यासस्य-फलोदयाय सुमन-
स्संसेव्य-मिच्छाकृतिम् । नृत्यद्भक्त-मयूर-
मद्रिनिलयं चञ्चज्जटा-मण्डलं शंभो वांछति
नीलकन्धर सदा त्वां मे मनश्चातकः ॥५२॥
आकाशेन शिखी समस्तफणिनां नेत्रा कलापी

नताऽनुग्राहि-प्रणवोपदेश-निनदैश-निनदैःकेकीति
यो गीयते । श्यामां शैलसमुद्भवां घनरुचिं
दृष्ट्वा नटन्तं मुदा वेदान्तोपवने विहार-रसिकं
तं नीलकण्ठं भजे ॥५३॥
सन्ध्याघर्म-दिनात्ययो हरिकराघात-प्रभूतानक-ध्वानो
वारिदगर्जितं दिविषदां दृष्टिच्छटा चञ्चला ।
भक्तानां परितोष-बाष्प-विततिर्-वृष्टि-र्मयूरी शिवा
यस्मिन्नुज्ज्वल-ताण्डवं विजयते तं नीलकण्ठं भजे
॥५४॥ आद्यायामित-तेजसे श्रुतिपदै-र्वेद्याय ते
विद्यानन्दमयात्मने त्रिजगत-स्संरक्षणोद्योगिने ।
ध्येयायाखिल-योगिभि-स्सुरगणै-र्गेयाय मायाविने
सम्यक्ताण्डव-संभ्रमाय जटिने सेयं नतिश्शंभवे
॥५५॥ नित्याय त्रिगुणात्मने पुरजिते
कात्यायनी-श्रेयसे सत्यायादिकुटुंबिने मुनिमनः
प्रत्यक्ष-चिन्मूर्तये । मायासृष्ट-जगत्त्रयाय
सकलाम्नायान्त-सञ्चारिणे सायं ताण्डव-संभ्रमाय
जटिने सेयं नतिश्शंभवे ॥५६॥ नित्यं स्वोदर-
पोषणाय सकलानुद्दिश्य वित्ताशया व्यर्थं पर्यटनं
करोमि भवतस्सेवां न जाने विभो ।





मज्जन्मान्तर-पुण्यपाक-बलत-स्त्वं शर्व सर्वान्तर-स्तिष्ठस्येव हि तेन वा पशुपते ते रक्षणीयोऽस्म्यहम् ॥५७॥ एको वारिजबान्धवः क्षितिनभो व्याप्तं तमो-मण्डलं भित्वा लोचन-गोचरोपि भवति त्वं कोटिसूर्य-प्रभः । वेद्यःकिन्न भवस्यहो घनतरं कीदृग्-वेन्मत्तम-स्तत्सर्वं व्यपनीय मे पशुपते साक्षात् प्रसन्नो भव ॥५८॥ हंसःपद्मवनं समिच्छति यथा नीलांबुदं चातकः कोकः कोकनद-प्रियं प्रतिदिनं चन्द्रं चकोरस्तथा । चेतो वाञ्छति मामकं पशुपते चिन्मार्ग-मृग्यं विभो गौरीनाथ भवत्पदाब्ज-युगलं कैवल्य-सौख्य-प्रदम् ॥५९॥ रोध-स्तोयहृतः श्रमेणपथिक-श्छायां तरो-र्वृष्टितः भीतः स्वस्थगृहं गृहस्थ-मतिथि-र्दीनः प्रभुं धार्मिकम् । दीपं सन्तमसाकुलश्च शिखिनं शीतावृत-स्त्वं तथा चेतस्सर्व-भयापहं व्रजसुखं शंभोः पदांभोरुहम् ॥६०॥ अङ्कोलं निजबीजसन्तति-रयस्कान्तोपलं सूचिका

साध्वी नैजविभुं लता क्षितिरुहं सिन्धुस्सरिद्वल्लभम् ।
प्राप्नोतीह यथा तो पशुपतेः पादारविन्द-द्वयं
चेतोवृत्ति-रुपेत्य तिष्ठति सदा सा भक्तिरित्युच्यते
॥६१॥ आनन्दाश्रुभि-रातनोति पुलकं नैर्मल्यत-
श्छादनं वाचा शङ्खमुखे स्थितैश्च जठरा-पूर्तिं
चरित्रामृतैः । रुद्राक्षै-र्भसितेन देव वपुषो रक्षां
भवद्भावना-पर्यङ्के विनिवेश्य भक्तिजननि
भक्तार्भकं रक्षति ॥६२॥
मार्गावर्तित-पादुका पशुपते-रङ्गस्य कूर्चायते
गण्डूषांबु-निषेचनं पुर-रिपो-दिव्याभिषेकायते ।
किञ्चिद्भक्षित-मांसशेष-कबलं नव्योपराहायते
भक्तिःकिं न करोत्यहो वनचरो भक्तावतंसायते
॥६३॥ वक्षस्ताडन-मन्तकस्य कठिनापस्मार-
संमर्दनं भूभृत्पर्यटनं नमत्सुरशिरः-कोटीर-सङ्घर्षणम् ।
कर्मेदं मृदुलस्य तावक-पदद्वन्द्वस्य गौरीपते
मच्चेतो-मणिपादुका-विहरण शंभो सदाङ्गीकुरु ॥६४॥
वक्षस्ताडन-शङ्कया विचलितो वैवस्वतो निर्जराः
कोटीरोज्ज्वल-रत्नदीपकलिका-नीराजनं कुर्वते ।

दृष्ट्वा मुक्ति वधू-स्तनोति निभृताश्लेषं भवानीपते
यच्चेत-स्तव पादपद्म-भजनं तस्येह किं दुर्लभम्
॥६५॥ क्रीडार्थं सृजसि प्रपञ्च-मखिलं
क्रीडामृगा-स्ते जनाः यत्कर्माचरितं मया च
भवतः प्रीत्यै भवत्येव तत् । शंभो स्वस्य
कुतूहलस्य करणं मच्चेष्टितं निश्चितं तस्मान्मामक-
रक्षणं पशुपते कर्तव्य-मेव त्वया ॥६६॥
बहुविध-परितोष-बाष्पपूर-स्फुट-पुलकाङ्कित-चारु-भोग-
भूमिम् । चिरपद-फलकाङ्क्षिसेव्यमानां
परमसदाशिव-भावनां प्रपद्ये ॥६७॥
अमितमुदमृतं मुहुर्दुहन्तीं विमल-भवत्पद-गोष्ठ-
मावसन्तीम् । सदय पशुपते सुपुण्य-पाकां
मम परिपालय भक्तिधेनु-मेकाम् ॥६८॥
जडता पशुता कलङ्किता कुटिल-चरत्वं च
नास्ति मयि देव । अस्ति यदि राजमौले
भवदाभरणस्य नास्मि किं पात्रम् ॥६९॥
अरहसि रहसि स्वतन्त्र-बुद्ध्या वरिवसितुं सुलभः
प्रसन्नमूर्तिः । अगणित-फलदायकः





प्रभुर्मेजगदधिको हृदि राजशेखरोस्ति ॥७० ॥

आरूढ-भक्ति-गुण-कुञ्चितांव-चाप-युक्तैश्शिवस्मरण-
बाणगणै-रमोघैः । निर्जित्य किल्बिष-रिपून्
विजयी सुधीन्द्र-स्सानन्द-मावहति सुस्थिर-
राजलक्ष्मीम् ॥७१ ॥

ध्यानाञ्जनेन समवेक्ष्य तमः-प्रदेशं भित्वा
महाबलिभि-रीश्वरनाम-मन्त्रैः । दिव्याश्रितं
भुजगभूषण-मुद्वहन्ति ये पादपद्म-मिह ते
शिव ते कृतार्थाः ॥७२ ॥

भूदारता-मुदवहद्यदपेक्षया श्री-भूदार एव
किमतस्सुमते लभस्व । केदार-माकलित-मुक्ति–
महौषधीनां पादारविन्दभजनं परमेश्वरस्य ॥७३ ॥

आशापाश-क्लेश-दुर्वासनादि-भेदोद्युक्तै-र्दिव्यगन्धै-
रमन्दैः । आशा-शाटीकस्य पादारविन्दं चेतः-पेटीं
वासितां मे तनोतु ॥७४ ॥

कल्याणिनं सरस-चित्र-गतिं सवेगं सर्वेङ्गितज्ञ-मनघं
ध्रुव-लक्षणाढ्यम् । चेतस्तुरङ्ग-मधिरुह्य चर स्मरारे ।
नेत-स्समस्तजगतां वृषभाधिरूढ ॥७५ ॥

भक्ति-र्महेश-पदपुष्कर-मावसन्ती कादंबिनीव

कुरुते परितोषवर्षम् । संपूरितो भवति यस्य मनस्तटाक-मनस्तज्जन्म-सस्य-मखिलं सफलं च नान्यत् ॥७६॥

बुद्धिःस्थिरा-भवितु-मीश्वर-पादपद्म-सक्तता वधूर्विरहिणीव सदा स्मरन्ती । सद्भावना-स्मरण-दर्शन-कीर्तनादि संमोहितेव शिवमन्त्र-जपेन विन्ते ॥७७॥

सदुपचार-विधिश्वनुबोधितां सविनयां सुहृदं सदुपाश्रिताम् । मम समुद्धर बुद्धि-मिमां प्रभो वरगुणेन नवोढ-वधूमिव ॥७८॥

नित्यं योगिमन-स्सरोज-दल-सञ्चार-क्षम-स्त्वत्-क्रम-श्शंभो तेन कथं कठोर-यमराड्वक्षः-कवाटक्षतिः । अत्यन्तं मृदुलं त्वदङ्घ्रियुगलं हा मे मनश्चिन्तय-त्येतल्लोचन-गोचरं कुरु विभो हस्तेन संवाहये ॥७९॥

एष्यत्येषजनिं मनोऽस्य कठिनं तस्मिन्नटानीति मद्रक्षायै गिरिसीम्नि कोमलपद-न्यासः-पुराभ्यासितः । नोचे-द्दिव्य-गृहान्तरेषु सुमन-स्तल्पेषु वेद्यादिषु प्रायस्सत्सु शिलतलेषु नटनं शंभो किमर्थं तव ॥८०॥

कश्चित्काल-मुमामहेश भवतः पादारविन्दार्चनैः
कश्चिद्ध्यान-समाधिभिश्च नतिभिः कश्चित्
कथाकर्णनैः । कश्चित् कश्चिदवेक्षणैश्च नुतिभिः
कश्चिद्दशामीदृशीं यःप्राप्नोति मुदा त्वदीर्पित-मना
जीवन् स मुक्तः खलु ॥८१॥

बाणत्वं वृषभत्व-मर्धवपुषा भार्यात्व-मार्यापते
घोणित्वं सखिता मृदङ्गवहता चेत्यादिरूपं दधौ ।
त्वत्पादे नयनार्पणञ्च कृतवान् त्वद्देहभागो हरिः
पूज्यात्पूज्यतरस्स एव हि न चेत् को वा
तदन्योऽधिकः ॥८२॥

जनन-मृति-युतानां सेवया देवतानां न
भवति सुखलेश-स्संशयो नास्ति तत्र ।
अजनि-ममृतरूपं सांबमीशं भजन्ते य इह
परमसौख्यं ते हि धन्या लभन्ते ॥८३॥

शिव तव परिचर्या-सन्निधानाय गौर्या भव मम
गुणधुर्यां बुद्धिकन्यां प्रदास्ये । सकल-भुवन-
बन्धो-सच्चिदानन्द-सिन्धो सदय हृदय-गेहे
सर्वदा संवस त्वम् ॥८४॥

जलधिमथनदक्षो नैव पातालभेदी न च
वनमृगयायां नैव लुब्धः प्रवीणः ।
अशन-कुसुम-भूषा-वस्त्रमुख्यां सपर्यां
कथय कथमहं ते कल्पयानीन्दुमौले ॥८५॥
पूजाद्रव्य-समृद्धयो विरचिताः पूजां कथं कुर्महे
पक्षित्वं न च वा किटित्व-मपि न प्राप्तं मया
दुर्लभम् । जाने मस्तक-मङ्घ्रिपल्लव-मुमाजाने न
तेऽहं विभो न ज्ञातं हि पितामहेन
हरिणा तत्त्वेन तद्रूपिणा ॥८६॥
अशलं हरलं फणि कलापो वसनं चर्म च
वाहनं महोक्षः । मम दास्यसि किं किमस्ति
शंभो तव पादांबुज-भक्तिमेव देहि ॥८७॥
यदा कृतांभोनिधि-सेतुबन्धनः करस्थलाधः कृत-
पर्वताधिपः । भवानि ते लङ्घित-पद्मसंभवः तदा
शिवार्चा-स्तव-भावन-क्षमः ॥८८॥
नतिभि-र्नुतिभि-स्तवमीशपूजा-विधिभिर्ध्यान-
समाधिभि-र्न तुष्टः । धनुषा मुसलेन चाश्मभि-र्वा
वद ते प्रीतिकरं तथा करोमि ॥८९॥

वचसा चरितं वदामि शंभो-रह-मुद्योग-विधासु तेऽप्रसक्तः । मनसाकृति-मीश्वरस्य सेवे शिरसा चैव सदाशिवं नमामि ॥९०॥

आद्याऽविद्या हृद्गता निर्गतासी-द्विद्या हृद्या हृद्गता त्वत्प्रसादात् । सेवे नित्यं श्रीकरं त्वत्पदाब्जं भावे मुक्ते-र्भाजनं राजमौले ॥९१॥

दूरीकृतानि दुरितानि दुरक्षराणि दौर्भाग्य-दुःख-दुरहङ्कृति-दुर्वचांसि । सारं त्वदीयचरितं नितरां पिबन्तं गौरीश मामिह समुद्धर सत्कटाक्षैः ॥९२॥ सोम-कलाधर-मौलौ कोमल-घनकन्धरे महामहसि । स्वामिनि गिरिजानाथे मामक-हृदयं निरन्तरं रमताम् ॥९३॥

सा रसना ते नयने तावेव करौ स एव कृतकृत्यः । या ये यौ यो भर्गं वदतीक्षेते सदार्चतः स्मरति ॥९४॥

अतिमृदुलौ मम चरणावतिकठिनं ते मनो भवानीश । इति विचिकित्सां सन्त्यज कथमासीद्गिरौ तथा प्रवेशः ॥९५॥

धैर्याङ्कुशेन निभृतं रभसादाकृष्य भक्ति श्रृङ्खलया । पुरहर चरणालाने हृदय-मदेभं बधान चिद्यन्त्रैः ॥९६॥

सर्वालङ्कारयुक्तां सरलपदयुतां साधुवृत्तां सुवर्णां सद्भिस्संस्तूयमानांसरसगुणयुतां लक्षितां लक्षणाढयाम् । उद्यद्भूषाविशेषा-मुपगतविनयां द्योतमानार्थ-रेखां कल्याणीं देव गौरी-प्रिय मम कविता-कन्यकां त्वं गृहाण ॥९८॥

इदं ते युक्तं वा परमशिव कारुण्यजलधे गतौ तिर्यग्रूपं तव पदशिरो-दर्शन-धिया । हरिब्रह्माणौ तौ दिवि भुवि चरन्तौ श्रमयुतौ कथं शंभो स्वामिन् कथय मम वेद्योसि पुरतः ॥९९॥

स्तोत्रेणाल-महं प्रवच्मि न मृषा देवा विरिञ्चादयः स्तुत्यानां गणनाप्रसङ्ग-समये त्वामग्रगण्यं विदुः । माहात्म्याग्र-विचारण-प्रकरेण धानातुषस्तोमव-द्धूतास्त्वां विदुरुत्तमोत्तम-फलं शंभो भवत्सेवकाः ॥१००॥

इति श्रीमत्परमहंस-परिव्राजकाचार्य

श्रीमच्छङ्कराचार्य-विरचित-शिवानन्दलहरी समाप्ता ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

ॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐ

॥ शिवमहिम्नस्तोत्र - पुष्पदन्त ॥

॥ अथ श्री शिवमहिम्नस्तोत्रम् ॥

महिम्नः पारं ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः।
अथाऽवाच्यः सर्वः स्वमतिपरिणामावधि गृणन्
ममाप्येष स्तोत्रे हर निरपवादः परिकरः ॥१ ॥
अतीतः पंथानं तव च महिमा वाङ्मनसयोः
अतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि।
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः
पदे त्वर्वाचीने पतति न मनः कस्य न वचः
॥२ ॥ मधुस्फीता वाचः परमममृतं निर्मितवतः
तव ब्रह्मन् किं वागपि सुरगुरोर्विस्मयपदम् ।
मम त्वेतां वाणीं गुणकथनपुण्येन भवतः

पुनामीत्यर्थेऽस्मिन् पुरमथन बुद्धिर्व्यवसिता ॥३॥
तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत् त्रयीवस्तु
व्यस्तं तिस्त्रुषु गुणभिन्नासु तनुषु ।
अभव्यानामस्मिन् वरद रमणीयामरमणीं
विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः ॥४॥
किमीहः किंकायः स खलु किमुपायस्त्रिभुवनं
किमाधारो धाता सृजति किमुपादान इति च ।
अतर्क्यैश्वर्ये त्वय्यनवसर दुःस्थो हतधियः
कुतर्कोऽयं कांश्चित् मुखरयति मोहाय जगतः
॥५॥ अजन्मानो लोकाः किमवयववन्तोऽपि
जगतां अधिष्ठातारं किं भवविधिरनादृत्य भवति ।
अनीशो वा कुर्याद् भुवनजनने कः परिकरो यतो
मद्वास्त्वां प्रत्यमरवर संशेरत इमे ॥६॥
त्रयी साङ्ख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च ।
रुचीनां वैचित्र्यादृजुकुटिल नानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥७॥

महोक्षः खट्वाङ्गं परशुरजिनं भस्म फणिनः
कपालं चेतीयत्तव वरद तन्त्रोपकरणम् ।
सुरास्तां तामृद्धिं दधति तु भवद्भ्रूप्रणिहितां
न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥८॥
ध्रुवं कश्चित् सर्वँ सकलमपरस्त्वध्रुवमिदं परो
ध्रौव्याऽध्रौव्यो जगति गदति व्यस्तविषये ।
समस्तेऽप्येतास्मिन् पुरमथन तैर्विस्मित इव
स्तुवन्। जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता
॥९॥ तवैश्वर्यँ यत्नाद् यदुपरि बिरिञ्चिर्हरिरधः
परिच्छेतुं यातावनलमनलस्कन्धवपुषः ।
ततो भक्तिश्रद्धा-भरगुरु-गृणद्भ्यां गिरिश यत् स्वयं
तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ॥१०॥
अयत्नादासाद्य त्रिभुवनमवैरव्यतिकरं दशास्यो
यद्बाहूनभृत रणकण्डू-परवशान् । शिरःपद्मश्रेणी-
रचितचरणाम्भोरुह-बलेः स्थिरायास्त्वद्भक्तेस्त्रिपुरहर
विस्फूर्जितमिदम् ॥११॥ अमुष्य त्वत्सेवा-
समधिगतसारं भुजवनं बलात् कैलासेऽपि

त्वदधिवसतौ विक्रमयतः । अलभ्या पातालेऽप्यलसचलिताङ्गुष्ठशिरसि प्रतिष्ठा त्वय्यासीद् ध्रुवमुपचितो मुह्यति खलः ॥१२॥ यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सतीं अधश्चक्रे बाणः परिजनविधेयत्रिभुवनः । न तच्चित्रं तस्मिन् वरिवसितरि त्वच्चरणयोः न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः ॥१३॥ अकाण्ड-ब्रह्माण्ड-क्षयचकित-देवासुरकृपा विधेयस्याऽऽसीद् यस्त्रिनयन विषं संहृतवतः । स कल्माषः कण्ठे तव न कुरुते न श्रियमहो विकारोऽपि श्लाघ्यो भुवन-भय-भङ्ग-व्यसनिनः ॥१४॥ असिद्धार्था नैव क्वचिदपि सदेवासुरनरे निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः। स पश्यन्निश त्वामितरसुरसाधारणमभूत् स्मरः स्मर्तव्यात्मा न हि वशिषु पथ्यः परिभवः ॥१५॥ मही पादाघाताद् व्रजति सहसा संशयपदं पदं

विष्णोर्भ्राम्यद् भुज-परिघ-रुग्ण-ग्रह-गणम् ।
मुहुर्द्यौर्दौस्थ्यं यात्यनिभृत-जटा-ताडित-तटा
जगद्रक्षायै त्वं नटसि ननु वामैव विभुता ॥१६॥
वियद्व्यापी तारा-गण-गुणित-फेनोद्गम-रुचिः प्रवाहो
वारां यः पृषतलघुदृष्टः शिरसि ते ।
जगद्द्वीपाकारं जलधिवलयं तेन कृतमिति
अनेनैवोन्नेयं धृतमहिम दिव्यं तव वपुः ॥१७॥
रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथाङ्गे चन्द्रार्कौ रथ-चरण-पाणिः शर इति ।
दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बर-विधिः विधेयैः
क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः ॥१८॥
हरिस्ते साहस्रं कमल बलिमाधाय पदयोः
यदेकोने तस्मिन् निजमुदहरन्नेत्रकमलम् ।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषः त्रयाणां
रक्षायै त्रिपुरहर जागर्ति जगताम् ॥१९॥
क्रतौ सुप्ते जाग्रत् त्वमसि फलयोगे क्रतुमतां
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते ।

अतस्त्वां सम्प्रेक्ष्य क्रतुषु फलदान-प्रतिभुवं श्रुतौ

श्रद्धां बध्वा दृढपरिकरः कर्मसु जनः ॥२०॥

क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृतां

ऋषीणामार्त्विज्यं शरणद सदस्याः सुर-गणाः ।

क्रतुभ्रंशस्त्वत्तः क्रतुफल-विधान-व्यसनिनः ध्रुवं

कर्तुः श्रद्धा-विधुरमभिचाराय हि मखाः ॥२१॥

प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं गतं

रोहिद् भूतां रिरमयिषुमृष्यस्य वपुषा ।

धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं त्रसन्तं

तेऽद्यापि त्यजति न मृगव्याधरभसः ॥२२॥

स्वलावण्याशंसा धृतधनुषमह्नाय तृणवत् पुरः

प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि । यदि स्त्रैणं

देवी यमनिरत-देहार्ध-घटनात् अवैति त्वामद्धा

बत वरद मुग्धा युवतयः ॥२३॥

श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचराः

चिता-भस्मालेपः स्रगपि नृकरोटी-परिकरः ।

अमङ्गल्यं शीलं तव भवतु नामैवमखिलं

तथापि स्मर्तॄणां वरद परमं मङ्गलमसि ॥२४॥

मनः प्रत्यक्चित्ते सविधमविधायात्त-मरुतः

प्रहृष्यद्रोमाणः प्रमद-सलिलोत्सङ्गति-दृशः ।

यदालोक्याह्लादं ह्रद इव निमज्यामृतमये

दधत्यन्तस्तत्त्वं किमपि यमिनस्तत्

किल भवान् ॥२५॥ त्वमर्कस्त्वं सोमस्त्वमसि

पवनस्त्वं हुतवहः त्वमापस्त्वं व्योम त्वमु

धरणिरात्मा त्वमिति च । परिच्छिन्नामेवं

त्वयि परिणता बिभ्रति गिरं न विद्मस्तत्तत्त्वं

वयमिह तु यत् त्वं न भवसि ॥२६॥

त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरान्

अकाराद्यैर्वर्णैस्त्रिभिरभिदधत् तीर्णविकृति ।

तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः समस्तं

व्यस्तं त्वां शरणद गृणात्योमिति पदम् ॥२७॥

भवः शर्वो रुद्रः पशुपतिरथोग्रः सहमहान्

तथा भीमेशानाविति यदभिधानाष्टकमिदम् ।

अमुष्मिन् प्रत्येकं प्रविचरति देव श्रुतिरपि

प्रियायास्मैधाम्ने प्रणिहित-नमस्योऽस्मि भवते
॥२८॥ नमो नेदिष्ठाय प्रियदव दविष्ठाय च
नमः नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः।
नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमः
नमः सर्वस्मै ते तदिदमतिसर्वाय च नमः ॥२९॥
बहुल-रजसे विश्वोत्पत्तौ भवाय नमो नमः
प्रबल-तमसे तत् संहारे हराय नमो नमः ।
जन-सुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः
॥३०॥ कृश-परिणति-चेतः क्लेशवश्यं
क्व चेदं क्व च तव गुण-सीमोल्लङ्घिनी शश्वदृद्धिः।
इति चकितममद्रीकृत्य मां भक्तिराधाद् वरद
चरणयोस्ते वाक्य-पुष्पोपहारम् ॥३१॥
असित-गिरि-समं स्यात् कज्जलं सिन्धु-पात्रे
सुर-तरुवर-शाखा लेखनी पत्रमुर्वी । लिखति
यदि गृहीत्वा शारदा सर्वकालं तदपि तव
गुणानामीश पारं न याति ॥३२॥ असुर-सुर-

मुनीन्द्रैरर्चितस्येद्गु-मौलेः ग्रथित-गुणमहिम्नो
निर्गुणस्येश्वरस्य । सकल-गण-वरिष्ठः
पुष्पदन्ताभिधानः रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार
॥३३॥ अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत् पठति
परमभक्त्या शुद्ध-चित्तः पुमान् यः । स भवति
शिवलोके रुद्रतुल्यस्तथाऽत्र प्रचुरतर-धनायुः
पुत्रवान् कीर्तिमांश्च ॥३४॥ महेशान्नापरो देवो
महिम्नो नापरा स्तुतिः । अघोरान्नापरो मन्त्रो
नास्ति तत्त्वं गुरोः परम् ॥३५॥ दीक्षा
दानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः ।
महिम्नस्तव पाठस्य कलां नार्हन्ति षोडशीम्
॥३६॥ कुसुमदशन-नामा सर्व-गन्धर्व-राजः
शशिधरवर-मौलेर्देवदेवस्य दासः ।
स खलु निज-महिम्नो भ्रष्ट एवास्य रोषात्
स्तवनमिदमकार्षीद् दिव्य-दिव्यं महिम्नः ॥३७॥
सुरगुरुमभिपूज्य स्वर्ग-मोक्षैक-हेतुं
पठति यदि मनुष्यः प्राञ्जलिर्नान्य-चेताः ।

व्रजति शिव-समीपं किन्नरैः स्तूयमानः
स्तवनमिदममोघं पुष्पदन्तप्रणीतम् ॥३८॥
आसमाप्तमिदं स्तोत्रं पुण्यं गन्धर्व-भाषितम् ।
अनौपम्यं मनोहारि सर्वमीश्वरवर्णनम् ॥३९॥
इत्येषा वाङ्मयी पूजा श्रीमच्छङ्कर-पादयोः ।
अर्पिता तेन देवेशः प्रीयतां मे सदाशिवः
॥४०॥ तव तत्त्वं न जानामि कीदृशोऽसि
महेश्वर । यादृशोऽसि महादेव तादृशाय नमो
नमः ॥४१॥ एककालं द्विकालं वा त्रिकालं यः
पठेन्नरः । सर्वपाप-विनिर्मुक्तः शिव लोके
महीयते ॥४२॥ श्री पुष्पदन्त-मुख-पङ्कज-
निर्गतेन स्तोत्रेण किल्बिष-हरेण हर-प्रियेण ।
कण्ठस्थितेन पठितेन समाहितेन
सुप्रीणितो भवति भूतपतिर्महेशः ॥४३॥

॥ इति श्री पुष्पदन्त विरचितं शिवमहिम्नः स्तोत्रं समाप्तम् ॥

सार्थशिवताण्डवस्तोत्रम्

॥ श्री गणेशाय नमः ॥

जटा टवी गलज्जल प्रवाह पावितस्थले।
गलेवलम्ब्य लम्बितां भुजङ्ग तुङ्ग मालिकाम्।
डमड्-डमड्-डमड्-डमन्निनाद वड्डमर्वयं। चकार
चण्डताण्डवं तनोतु नः शिवः शिवम् ॥१॥
जटा कटा हंसभ्रम भ्रमन्निलिम्प निर्झरी।
विलो लवी चिवल्लरी विराजमान मूर्धनि ।
धगद् धगद् धगज्ज्वलल् ललाट पट्ट
पावके किशोर चन्द्र शेखरे रतिः प्रतिक्षणं
मम ॥२॥ धरा धरेन्द्र नद्रिनी विलास
बन्धु बन्धुरस् फुरद् दिगन्त सन्तति प्रमोद
मानमनसे । कृपा कटाक्ष धोरणी निरुद्ध
दुर्धरापदि क्वचिद् दिगम्बरे मनो विनोदमेतु
वस्तुनि ॥३॥ लता भुजङ्ग पिङ्गलस् फुरत्फणा
मणिप्रभा कदम्ब कुङ्कुमद्रवप् रलिप्तदिग्व
धूमुखे । मदान्ध सिन्धुरस् फुरत्
त्वगुत्तरीयमे दुरे मनो विनोद मद्भुतं बिभर्तु
भूतभर्तरि ॥४॥ सहस्र लोचनप्रभृत्य शेष
लेखशेखर प्रसून धूलिधोरणी विधूस राङ्घ्रि
पीठभूः । भुजङ्ग राजमालया निबद्ध

जाटजूटक श्रियै चिराय जायतां चकोर बन्धुशेखरः ॥५॥ ललाट चत्वरज्वलद् धनञ्जयस्फुलिङ्गभा निपीत पञ्चसायकं नमन्निलिम्प नायकम् । सुधा मयूखले खया विराजमानशेखरं महाकपालिसम्पदे शिरोज टालमस्तु नः ॥६॥ कराल भाल पट्टिका धगद् धगद् धगज्ज्वल द्धनञ्जयाहुती कृतप्रचण्ड पञ्चसायके । धरा धरेन्द्र नन्दिनी कुचाग्र चित्रपत्रक प्रकल्प नैक शिल्पिनित्रिलोचने रतिर्मम ॥७॥ नवीन मेघ मण्डली निरुद्- धदुर् धरस्फुरत्-कुहू निशीथि नीतमः प्रबन्ध बद्ध कन्धरः । निलिम्प निर्झरी धरस् तनोतु कृत्ति सिन्धुरः कला निधान बन्धुरः श्रियं जगद् धुरंधरः ॥८॥ प्रफुल्ल नीलपङ्कज प्रपञ्च कालिम प्रभावलम्बि कण्ठकन्दली रुचिप्रबद्ध कन्धरम् । स्मरच्छिदं पुरच्छिदं भवच्छिदं मखच्छिदं गजच्छिदान्ध कच्छिदं तमंत कच्छिदं भजे ॥९॥ अखर्व सर्व मङ्गला कला कदंब मञ्जरी

रस प्रवाह माधुरी विजृंभणा मधुव्रतम् ।
स्मरान्तकं पुरान्तकं भवान्तकं मखान्तकं
गजान्त कान्ध कान्त कं तमन्त कान्त कं भजे
॥१० ॥ जयत् वदभ्र भ्रमद् भुजङ्ग
मश्वसद्विनिर्ग मत् क्रमस्फुरत् कराल भाल
हव्यवाट् । धिमिद्धिमिद्धिमिध्वनन्मृदङ्गतुङ्गमङ्गल
ध्वनिक्रमप्रवर्तित प्रचण्डताण्डवः शिवः ॥११ ॥
स्पृषद्विचित्रतल्पयोर्भुजङ्गमौक्तिकस्रजोर्- -
गरिष्ठरत्नलोष्ठयोः सुहृद्विपक्षपक्षयोः ।
तृष्णारविद्गक्षुषोः प्रजामहीमहेन्द्रयोः समप्रवृत्तिकः
(समं प्रवर्तयन्मनः) कदा सदाशिवं भजे
॥१२ ॥ कदा निलिम्पनिर्झरीनिकुञ्जकोटरे वसन्
विमुक्तदुर्मतिः सदा शिरः स्थमञ्जलिं वहन् ।
विमुक्तलोललोचनो ललामभाललग्नकः शिवेति
मन्त्रमुच्चरन् कदा सुखी भवाम्यहम् ॥१३ ॥
इदम् हि नित्यमेवमुक्तमुत्तमोत्तमं स्तवं
पठन्स्मरन्ब्रुवन्नरो विशुद्धिमेतिसंततम् ।
हरे गुरौ सुभक्तिमाशु याति नान्यथा गतिं

विमोहनं हि देहिनां सुशङ्करस्य चिंतनम् ॥१४॥

पूजा वसान समये दशवक्त्र गीतं यः
शंभु पूजन परं पठति प्रदोषे ।
तस्य स्थिरां रथगजेन्द्र तुरङ्ग युक्तां
लक्ष्मीं सदैव सुमुखिं प्रददाति शंभुः ॥१५॥

॥ इति श्रीरावण-कृतम् शिव-ताण्डव-स्तोत्रम् सम्पूर्णम् ॥

श्री महागणपतये नमः ॥ शिवापराध क्षमापनस्तोत्र ॥

आदौ कर्मप्रसङ्गात्कलयति कलुषं मातृकुक्षौ स्थितं
मां विण्मूत्रामेध्यमध्ये कथयति नितरां जाठरो
जातवेदाः । यद्यद्वै तत्र दुःखं व्यथयति नितरां
शक्यते केन वक्तुं क्षन्तव्यो मेऽपराधः
शिव शिव शिव भो श्री महादेव शम्भो ॥१॥

बाल्ये दुःखातिरेको मल्लुलितवपुः स्तन्यपाने
पिपासा नो शक्तश्चेन्द्रियेभ्यो भवगुणजनिताः
जन्तवो मां तुदन्ति । नानारोगादिदुःखाद्रुदनपरवशः

शङ्करं न स्मरामि क्षन्तव्यो मेऽपराधः
शिव शिव शिव भो श्री महादेव शम्भो ॥२॥

प्रौढोऽहं यौवनस्थो विषयविषधरैः पञ्चभिर्मर्मसन्धौ






दृष्टो नष्टोऽविवेकः सुतधनयुवतिस्वादुसौख्ये निषण्णः ।
शैवीचिन्ताविहीनं मम हृदयमहो मानगर्वाधिरूढं
क्षन्तव्यो मेऽपराधः
शिव शिव शिव भो श्री महादेव शम्भो ॥३॥
वार्धक्ये चेन्द्रियाणां विगतगतिमतिश्चाधिदैवादितापैः
पापै रोगैर्वियोगैस्त्वनवसितवपुः प्रौढहीनं च
दीनम् । मिथ्यामोहाभिलाषैर्भ्रमति मम मनो
धूर्जटेर्ध्यानशून्यं क्षन्तव्यो मेऽपराधः
शिव शिव शिव भो श्री महादेव शम्भो ॥४॥
नो शक्यं स्मार्तकर्म प्रतिपदगहनप्रत्यवायाकुलाख्यं
श्रौते वार्ता कथं मे द्विजकुलविहिते ब्रह्ममार्गेऽसुसारे ।
ज्ञातो धर्मो विचारैः श्रवणमननयोः किं
निदिध्यासितव्यं क्षन्तव्यो मेऽपराधः
शिव शिव शिव भो श्री महादेव शम्भो ॥५॥
स्नात्वा प्रत्यूषकाले स्नपनविधिविधौ
नाहृतं गाङ्गतोयं पूजार्थं वा
कदाचिद्बहुतरगहनात्खण्डबिल्वीदलानि ।
नानीता पद्ममाला सरसि विकसिता
गन्धधूपैः त्वदर्थं क्षन्तव्यो मेऽपराधः






शिव शिव शिव भो श्री महादेव शम्भो ॥६॥
दुग्धैर्मध्वाज्युतैर्दधिसितसहितैः स्नापितं नैव लिङ्गं
नो लिप्तं चन्द्रनाद्यैः कनकविरचितैः पूजितं न
प्रसूनैः । धूपैः कर्पूरदीपैर्विविधरसयुतैर्नैव
भक्ष्योपहारैः क्षन्तव्यो मेऽपराधः
शिव शिव शिव भो श्री महादेव शम्भो ॥७॥
ध्यात्वा चित्ते शिवाख्यं प्रचुरतरधनं नैव दत्तं
द्विजेभ्यो हव्यं ते लक्षसङ्ख्यैर्हुतवहवदने नार्पितं
बीजमन्त्रैः । नो तप्तं गाङ्गातीरे व्रतजननियमैः
रुद्रजाप्यैर्न वेदैः क्षन्तव्यो मेऽपराधः
शिव शिव शिव भो श्री महादेव शम्भो ॥८॥
स्थित्वा स्थाने सरोजे प्रणवमयमरुत्कुम्भके
(कुण्डले) सूक्ष्ममार्गे शान्ते स्वान्ते प्रलीने
प्रकटितविभवे ज्योतिरूपेऽपराख्ये । लिङ्गज्ञे
ब्रह्मवाक्ये सकलतनुगतं शङ्करं न स्मरामि
क्षन्तव्यो मेऽपराधः
शिव शिव शिव भो श्री महादेव शम्भो ॥९॥
नग्नो निःसङ्गशुद्धस्त्रिगुणविरहितो ध्वस्तमोहान्धकारो
नासाग्रे न्यस्तदृष्टिर्विदितभवगुणो नैव दृष्टः

कदाचित्। उन्मन्याऽवस्थया त्वां विगतकलिमलं
शङ्करं न स्मरामि क्षन्तव्यो मेऽपराधः
शिव शिव शिव भो श्री महादेव शम्भो ॥१०॥
चन्द्रोद्भासितशेखरे स्मरहरे गङ्गाधरे शङ्करे
सर्पैर्भूषितकण्ठकर्णयुगले (विवरे) नेत्रोत्थवैश्वानरे।
दन्तित्वक्कृतसुन्दराम्बरधरे त्रैलोक्यसारे हरे मोक्षार्थं
कुरु चित्तवृत्तिमचलामन्यैस्तु किं कर्मभिः ॥११॥
किं वानेन धनेन वाजिकरिभिः प्राप्तेन राज्येन किं
किं वा पुत्रकलत्रमित्रपशुभिर्देहेन गेहेन किम्।
ज्ञात्वैतत्क्षणभङ्गुरं सपदि रे त्याज्यं मनो दूरतः
स्वात्मार्थं गुरुवाक्यतो भज मन श्रीपार्वतीवल्लभम्
॥१२॥
आयुर्नश्यति पश्यतां प्रतिदिनं याति क्षयं यौवनं
प्रत्यायान्ति गताः पुनर्न दिवसाः कालो
जगद्भक्षकः। लक्ष्मीस्तोयतरङ्गभङ्गचपला
विद्युच्चलः जीवितं तस्मात्त्वां (मां) शरणगतं
शरणद त्वं रक्ष रक्षाधुना ॥१३॥
वन्दे देवमुमापतिं सुरगुरुं वन्दे जगत्कारणं

वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम् ।
वन्दे सूर्यशशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम्
॥१४ ॥

गात्रं भस्मसितं च हसितं हस्ते कपालं सितं
खट्वाङ्गं च सितं सितश्च वृषभः कर्णे सिते कुण्डले ।
गङ्गाफेनसिता जटा पशुपतेश्चन्द्रः सितो मूर्धनि
सोऽयं सर्वसितो ददातु विभवं पापक्षयं सर्वदा
॥१५ ॥

करचरणकृतं वाक्कायजं कर्मजं वा
श्रवणनयनजं वा मानसं वाऽपराधम् ।
विहितमविहितं वा सर्वमेतत्क्षमस्व
शिव शिव करुणाब्धे श्रीमहादेव शम्भो
॥१६ ॥ ॥ इति श्रीमद् शङ्कराचार्यकृत
शिवापराधक्षमापण स्तोत्रं सम्पूर्णम् ॥

श्रीगुरुभ्यो नमः ॥ ॥ श्रीमहागणपतये नमः ॥

॥ शिवरहस्योक्त गणेशकृत रुद्रनमकम् ॥






शिव ध्यान श्लोकः ॥ आपाताल-नभस्स्थलान्त-भुवन-ब्रह्माण्डमाविस्फुर-ज्ज्योतिः स्फाटिकलिङ्गमौलि-विलसत्पूर्णेंदुवान्तामृतैः ।
अस्तोकाप्लुत मेकमीशमनिशं रुद्रानुवाकाञ्जपन्
ध्यायेदीप्सितसिद्धये ध्रुवपदं विप्रोऽभिशिञ्चेच्छिवम् ॥

ब्रह्माण्डव्याप्तदेहा भसित-हिमरुचा
भासमाना भुजङ्गैः कण्ठेकालाः कपर्दाकलित-
शशिकलाश्चण्डकोदण्डहस्ताः ।
त्र्यक्षा रुद्राक्षमालाः सुललितवपुशः शाम्भवा
मूर्तिभेदाः रुद्राश्श्रीरुद्रसूक्तप्रकटित-विभवा
नः प्रयच्छन्तु सौख्यम् ॥

इत्युक्त्वा स्तवरं साम्भं स्मृत्वा शङ्करपाधुके ।
ध्यात्वा ययौ गणाधीशः शिवसन्निधिमाधरात् ॥

ततः प्रणम्य बहुधा कृताञ्जलिपुटः प्रभुं ।
शंभु स्तोतुं मतिं चक्रे सर्वाभीष्टप्रदायकम् ॥

गणाधीशउवाच ॥ *नमकः ॥*

नमस्ते देवदेवाय नमस्ते रुद्रमन्यवे ।






नमस्ते चन्द्रचूडायाप्युतोत इषवे नमः ॥१ ॥
नमस्ते पार्वतीकान्त नमस्ते मेरुधन्वने ।
नमस्ते भगवान् शंभो भाहुभ्यामुतते नमः ॥२ ॥
इषुः शिवतमा या ते तया मृडय रुद्र मां ।
शिवं धनुर्यद्भव तेनापि मृडयाधुना ॥३ ॥
शरव्या या शिवतमा तयापि मृडया प्रभो ।
या ते रुद्र शिवा नित्यं सर्वमङ्गलसाधनम् ॥४ ॥
तयाभिचाकशीहि त्वं तनुवा मामुमापते ।
अघोरयापि तनुवा रुद्राद्या पापकाशिनी ॥५ ॥
या तया मृडय स्वामिन् सदा शन्तमया प्रभो ।
गिरिशन्तं महारुद्र हस्ते यामिषु मस्तवे ॥६ ॥
बिभर्षि तां गिरित्राद्या शिवां कुरु शिवांपते ।
शिवेन वचसा रुद्र नित्यं त्वाच्छादयामसि ॥७ ॥
त्वद्भक्तिपरिपूताङ्गं मा हिꣳसीः पुरुषं जगत् ।
यन्नः शर्व जगत्सर्वमयक्ष्म सुमनाभवत् ॥८ ॥
यथा तथाव मां रुद्र तदन्यदपि मे प्रभो ।
रुद्र त्वं प्रथमो दैव्यो भिषक् पाप विनाशकः ॥९ ॥

अधिवक्ताध्यवोचन्मा भवलिङ्गार्चकं मुदा ।
अहीन् सर्वान्यातुधान्यः सर्वा अप्यद्य जंभयन् ॥१० ॥
असौ ताम्रोऽरुणो बभ्रुः नीलग्रीवो सुमङ्गलः ।
विलोहितोऽस्त्ययं शंभो त्वधिष्ठानमेव हि ॥११ ॥
नमो नमस्ते भगवन्नीलग्रीवाय मीढुषे ।
सहस्राक्षाय शुद्धाय सच्चिदानन्द मूर्तये ॥१२ ॥
उभयोरार्त्नियोर्ज्याय धन्वनस्तां प्रमुञ्चतां ।
संप्राप्य धनुरन्येषां भयाय प्रभविष्यति ॥१३ ॥
अस्मद्भय विनाशार्थमधुना भयद प्रभो ।
याश्च ते हस्त इषवः पारा ता भगवो वप ॥१४ ॥
अवतत्य धनुस्तत्वं सहस्राक्ष शतेषुधे ।
मुखा निशीर्य शल्यानां शिवो नः सुमना भव ॥१५ ॥
विज्यं धनुरिदं भूयाद्विशल्यो बाणवानपि ।
अनेशन्निषवोऽप्यस्याप्याभुरस्य निषङ्गथिः ॥१६ ॥
कपर्दिनो महेशस्य यदि नाभूर्निषङ्गदीः ।
इषवोऽपि समर्थाश्चेत्साग्रत्वेन भयं भवेत् ॥१७ ॥
या ते हेतिर्धनुर्हस्ते मीढुष्टुम बभूव या ।
तयास्मान्विश्वतस्तेन पालय त्वमयक्ष्मया ॥१८ ॥

अनातततायायुधाय नमस्ते धृष्णवे नमः ।
बाहुभ्यां धन्वने शंभो नमो भूयो नमो नमः ॥१९ ॥
परि ते धन्वनो हेतिर्विंश्वतोऽस्मान् वृणक्तु सः ।
इषुधिस्तव यस्तावदस्मदारे निधेहि तम् ॥२० ॥
हिरण्य भाहवे तुभ्यं सेनान्ये ते नमो नमः ।
दिशां च पतये तुभ्यं पशूनां पतये नमः ॥२१ ॥ (६७)
त्विषीमते नमस्तुभ्यं नमस्सस्पिञ्जरायते ।
नमः पथीनां पतये बभ्लुषाय नमो नमः ॥२२ ॥
नमो विव्याधिनेन्नानां पतये प्रभवे नमः ।
नमस्ते हरिकेशाय रुद्रायास्तूपवीतिने ॥२३ ॥
पुष्टानां जगते तुभ्यं जगतां पतये नमः ।
संसारहेतिरूपाय रुद्रायाप्याततायिने ॥२४ ॥
क्षेत्राणां पतये तुभ्यं सूताय सुकृतात्मने ।
अहंत्याय नमस्तुभ्यं वनानां पतये नमः ॥२५ ॥
रोहिताय स्थपतये मन्त्रिणे वाणिजाय च ।
कक्षाणां पतये तुभ्यं नमस्तुभ्यं भुवन्तये ॥२६ ॥
तद्वारिवस्कृतायास्तु महादेवाय ते नमः ।






ओषधीनां च पतये नमस्तुभ्यं महात्मने ॥२७ ॥
उच्चैर्घोषाय धीराय धीराक्रन्दयते नमः ।
पत्तीनां पतये तुभ्यं कृत्स्नवीताय ते नमः ॥२८ ॥
धावते धवलायापि सत्वानां पतये नमः ।
नमस्ते सहमानाय तुभ्यं विव्याधिने नमः ॥२९ ॥
आव्याधिनीनां पतये ककुभाय निषङ्गिणे ।
सेनानां पतये तुभ्यं दिव्येषुधिमते ॥३० ॥
तस्कराणां च पतये वञ्चते परिवञ्चते ।
स्तायूनां पतये तुभ्यं नमस्तेस्तु निचेरवे ॥३१ ॥
नमः परिचरायापि महारुद्राय ते नमः ।
आरण्यानां च पतये मुष्णतां पतये नमः ॥३२ ॥
उष्णीषिणे नमस्तुभ्यं नमो गिरिचराय ते ।
कुलुञ्चानाञ्च पतये नमस्तेस्तु भवाय च ॥३३ ॥
नमो रुद्राय शर्वाय तुभ्यं पशुपतये नमः ।
नम उग्राय भीमाय नम अग्रेवधाय च ॥३४ ॥
नमो दूरेवधायापि नमो हन्त्रे नमो नमः ।
हनीयसे नमस्तुभ्यं नीलग्रीवाय ते नमः ॥३५ ॥
नमस्ते शितिकंठाय नमस्तेस्तु कपर्दिने ।

नमस्ते व्युप्तकेशाय सहस्राक्षाय मीढुषे ॥३६ ॥

गिरिशाय नमस्तेऽस्तु शिपिविष्टाय ते नमः ।

नमस्ते शंभवे तुभ्यं मयोभव नमोस्तुते ॥३७ ॥

मयस्कर नमस्तुभ्यं शङ्कराय नमो नमः ।

नमः शिवाय शर्वाय नमः शिवतराय च ॥३८ ॥

नमस्तीर्थ्याय कूल्याय नमः पार्याय ते नमः ।

अवार्याय नमस्तेऽस्तु नमः प्रतरणाय च ॥३९ ॥

नम उत्तरणायापि हरायार्ताय ते नमः ।

आलाद्याय नमस्तेऽस्तु भक्तानां वरदाय च ॥४० ॥

नमः शष्प्याय फेन्याय सिकत्याय च नमो नमः ।

प्रवाह्याय नमस्तेऽस्तु ह्रस्वायास्तु नमो नमः ॥४१ ॥

वामनाय नमस्तेऽस्तु नमोऽस्तु बृतहे नमः ।

वर्षीयसे नमस्तेऽस्तु नमो वृद्धाय ते नमः ॥४२ ॥

संवृध्वने नमस्तुभ्यमग्रियाय नमो नमः ।

प्रथमाय नमस्तुभ्य माशवे चाजिराय च ॥४३ ॥

शीघ्रियाय नमस्तुभ्यं शीभ्याय च नमो नमः ।

नम ऊर्व्याय सूर्म्यायप्यवस्वस्वन्याय ते नमः ॥४४ ॥

स्रोतस्याय नमस्तुभ्यं द्वीप्याय च नमो नमः ।
जेष्ठाय च नमस्तुभ्यं कनिष्ठाय च ते नमः ॥४५॥ (१०)
पूर्वजाय नमस्तुभ्यं नमोस्त्वपरजाय च ।
मध्यमाय नमस्तुभ्यमफगल्फाय ते नमः ॥४६ ॥
जघन्याय नमस्तुभ्यं बुध्नियाय नमो नमः ।
सोभ्याय प्रतिसर्याय याम्याय च नमो नमः ॥४७ ॥
क्षेम्याय च नमस्तुभ्यं याम्याय च नमो नमः ।
उर्वर्याय नमस्तुभ्यं खल्याय च नमो नमः ॥४८ ॥
श्लोक्याय चा वसान्यायावस्वन्याय च ते नमः ।
नमो वन्याय कक्ष्याय मौंज्याय च नमो नमः ॥४९ ॥
श्रवायच नमस्तुभ्यं प्रतिश्रव नमो नमः ।
आशुषेणाय शूराय नमोऽस्त्वाशुरथाय च ॥५० ॥ (१५)
वरूथिने वर्मिणे च बिल्मिने च नमो नमः ।
प्रहिताय नमस्तुभ्यं धृष्णवे प्रहिताय च ॥५१ ॥
पाराय पारविद्वाय नमस्तीक्ष्णेषवे नमः ।
सुधन्वने नमस्तुभ्यं स्वायुधाय नमो नमः ॥५२ ॥
नमः श्रुत्याय पथ्याय नमः काट्याय ते नमः ।
नमो नीप्याय सूद्याय सरस्याय च ते नमः ॥५३ ॥

नमो नाद्याय भव्याय वैशन्ताय च ते नमः ।

अवट्याय नमस्तुभ्यं नमः कूप्याय ते नमः ॥५४ ॥

अवर्ष्याय च वर्ष्याय च मेघ्याय च नमो नमः ।

विद्युत्याय नमस्तुभ्यमीद्रीयाय नमो नमः ॥५५ ॥

आतप्याय नमस्तुभ्यं वात्याय च नमो नमः ।

रेष्म्याय च नमस्तुभ्यं वास्तव्याय च ते नमः ॥५६ ॥

वास्तुपाय नमस्तेऽस्तु नमः सोमाय ते नमः ।

नमो रुद्राय ताम्रायाप्यरुणाय च ते नमः ॥५७ ॥

नम उग्राय भीमाय नमः शङ्गाय ते नमः ।

नमस्तीर्थ्याय कूल्याय सिकत्याय च ते नमः ॥५८ ॥ (१०४)

प्रवाह्याय नमस्तुभ्यमिरिण्याय च ते नमः ।

नमस्ते चन्द्रचूडाय प्रपथ्याय च ते नमः ॥५९ ॥

किंशिलाय नमस्तेस्तु क्षयणाय च ते नमः ।

कपर्दिने नमस्तेऽस्तु नमस्तेऽस्तु पुलस्तये ॥६० ॥

नमो गोष्ठ्याय गृह्याय ग्रहाणां पतये नमः ।

नमस्तल्प्याय गेहाय गुहावासाय ते नमः ॥६१ ॥

काट्याय गह्वरेष्ठाय ह्रदयाय च ते नमः ।

निवेष्प्याय नमस्तुभ्यं पांसव्याय च ते नमः ॥६२ ॥

रजस्याय नमस्तुभ्यं परात्परतराय च ।
नमस्ते हरिकेशाय शुष्क्याय नमो नमः ॥६३ ॥
हरित्याय नमस्तुभ्यं हरिद्वर्णाय ते नमः ।
नम ऊर्म्याय सूर्म्याय पर्ण्याय च नमो नमः ॥६४ ॥
नमोऽपगुरमाणाय पर्णशद्याय ते नमः ।
अभिघ्नते चाख्खिदते नमः प्रख्खिदते नमः ॥६५ ॥
विश्वरूपाय विश्वाय विश्वाधाराय ते नमः ।
त्रियंबकाय रुद्राय गिरिजापतये नमः ॥६६ ॥
मणिकोटीरकूटस्थकान्तिदीप्ताय ते नमः ।
वेदवेदान्तवेद्याय वृषारूढाय ते नमः ॥६७ ॥
अविज्ञेयस्वरूपाय सुद्रराय नमो नमः ।
उमाकान्तनमस्तेऽस्तु नमस्ते सर्वसाक्षिणे ॥६८ ॥
हिरण्यबाहवे तुभ्यं हिरण्याभरणाय च ।
नमो हिरण्यरूपाय रूपातीताय ते नमः ॥६९ ॥
हिरण्यपतये तुभ्यं अंबिकापतये नमः ।
तदुमापतये तुभ्यं नमः पापप्रणाशक ॥७० ॥
मीढुष्टमाय भर्गाय कद्रुद्राय प्रचेतसे ।
तव्यसे बिल्वपूज्याय नमः कल्याणरूपिणे ॥७१ ॥

अपारकल्याणगुणार्णवाय श्रीनीलकण्ठाय निरञ्जनाय ।
कालान्तकायापि नमो नमस्ते
दिक्कालरूपाय नमो नमस्ते ॥७२ ॥
वेदान्तवेदिस्तुतसद्गुणाय गुणप्रवीण गुणाश्रयाय ।
श्रीविश्वनाथाय नमो नमस्ते
काशी निवासाय नमो नमस्ते ॥७३ ॥
अजातसौद्गर्यसुधानिधान समृद्धिरूपाय शिवाधवाय ।
धराधराकार नमो नमस्ते
धारा स्वरूपाय नमो नमस्ते ॥७४ ॥
नीहारतारकरकाकराग प्रकारहाराप्रतिहारकाय ।
वीरेश्वरापारदयानिधान पाहिप्रभो पाहि नमो
नमस्ते ॥७५ ॥ स्वस्ति श्री शिवरहस्ये हराख्ये
तृतीयांशे पूर्वार्धे गणेशकृत रुद्राध्याय
स्तुतिर्नाम दशमः ॥
॥ श्री साम्बसदाशिवार्पणमस्तु ॥ *चमकः* ॥
नमो नमस्ते गिरिजा सहाय
नमो नमस्ते सुकृत स्वरूप ।

नमो नमस्तेऽन्नपते महेश
नमो नमस्तेऽस्तु नमो नमस्ते ॥१ ॥
त्वत्पादांबुजभक्तिर्मे निश्चला भवतु प्रभो ।
त्वमेव शरणं शंभो गतिस्त्वं जगतां प्रभो ॥२ ॥
कर्माण्यस्य फलोन्मुखानि भगवंस्त्वत्पादपद्मं
यतो दृष्टं दोषविवर्जितं सुखयुतं तावत्करोति स्वतः ।
तत्तावन्मुनिवृद्धमानसमनःपद्मप्रविष्टं प्रभो
तन्मे मानस पङ्कजे क्षणमिति स्वामिन् मुदे
जायताम् ॥३ ॥
वाजश्चमेऽस्तु प्रसवश्चमेऽस्तु त्वत्पूजया
सा प्रयतिश्च मेऽस्तु ।
महेश्वराशु प्रसितिश्च मे स्तु ध्वीतिश्चमेऽस्तु
ऋतुरस्तु शंभु ॥४ ॥
स्वरश्च मेऽस्तु वरदेश शंभो श्लोकश्चमेऽस्तु
श्रुतिगीतकीर्ते । श्रावश्चमेऽस्तु श्रुतिरस्तु शंभो
शिवभिधानश्रवणाय नित्यम् ॥५ ॥
ज्योतिश्चमेऽस्तु ज्वलन स्वरूप सुवश्चमेऽस्तु
त्रिपुरासुरारे । प्राणश्चमे तावदपानयुक्तो
व्यानश्चमेऽसुश्च तथैव चित्तम् ॥६ ॥

अधीतं च तथा वाक्च मनश्चक्षुश्च मे प्रभो ।
श्रोत्रं दक्षो बलं चोजः सहश्चायुश्च मे प्रभो ॥७ ॥
जरा चात्मा च मे शंभो तनूश्शर्म च वर्म च ।
अंगान्यस्थीनि भगवन् परूꣳषि च भवन्तु मे ॥८ ॥
शरीराणि भवन्त्वीश तानि रम्याणि मे प्रभो ।
ज्येष्ठ्यं च मेऽधिपत्यं च मनुर्भामश्च मे प्रभो ॥९ ॥
अमश्चांबश्च जेमा च महिमा वरिमा च मे ।
प्रथिमा चास्तु गौरीश वर्ष्मा च द्राघुया च मे ॥१० ॥
वृद्धं वृद्धिश्च सत्यं च श्रद्धा चास्तु जगच्च मे ।
धनं वशास्त्वहिश्चास्तु क्रीडा मोदश्च मे प्रभो ॥११ ॥
जातं जनिष्यमाणं च सूक्तं मे सुकृतं च मे ।
वित्तं वेद्यं च भूतं च भविष्यं च सुगं च मे ॥१२ ॥
सुपथं ऋद्धमृद्धिश्च क्लुप्तं क्लुप्तिश्च मे पतिः ।
सुमतिः शं मयश्चास्तु प्रियं चास्तु शिवाशु मे ॥१३ ॥
अनुकामश्च कामश्च शंभो सौमनसं च मे ।
भद्रं श्रेयश्च वस्यश्च यशो मे सुभगश्च मे ॥१४ ॥
द्रविणं चास्तु यन्ता च धर्ता क्षेमश्च मे धृतिः ।

विश्वं महश्च संविच्च ज्ञात्रं सूश्च प्रसूश्च मे ॥१५ ॥

शीरं रयो ऋतं चास्तु भगन्नमृतं च मे ।

अयक्ष्मं चानामयच्च जीवातु श्चास्तु मे सदा ॥१६ ॥

दीर्घायुत्वानमित्रं च सर्वदाप्यभयं च मे ।

सुगं च शयनं सूषा सुदिनं चास्तु मे सदा ॥१७ ॥

ऊर्क्चमे सूनृता चास्तु पयश्चास्तु रसश्च मे ।

घृतं मधु च सग्धिश्च सपीतिश्च कृषिश्च मे ॥१८ ॥

वृष्टिश्च चैत्रमौद्भिद्यं रयिश्चास्तु सदापि मे ।

रायः पुष्टं च पुष्टिश्च विभु च प्रभु च प्रभो ॥१९ ॥

बहु भूयश्च पूर्णं च तथा पूर्णतरं च मे ।

अक्षितिश्चास्तु भगवान्नूयवाश्च भवन्तु मे ॥२० ॥

अन्नमन्नपते मेस्तु केनास्तु क्षुश्च मे प्रभो ।

व्रीहयश्च यवा माषास्तिलामुद्गाश्च मे शिव ॥२१ ॥

खल्वाश्च सन्तु गोधूमा मसुराश्च प्रियङ्गवः ।

अणवः सन्तु मे नित्यं श्यामाकाः

सन्तु मे प्रभो ॥२२ ॥

नीवाराद्याश्च मे सन्तु गृहे सर्वान्ननायक ।

अश्मा च मृत्तिका चास्तु गिरयः पर्वताश्च मे ॥२३ ॥

सिकताः सन्तु भगवन्मे वनस्पतयश्च मे ।

हिरण्यमस्त्वयश्चास्तु तथा सीसं त्रपुश्च मे ॥२४ ॥

श्यामं लोहं च मेऽग्निश्च गृहे तिष्ठन्तु सर्वदा ।

आपश्च वीरुधः संतु तथैवोषधयोऽपि मे ॥२५ ॥

कृष्टवच्यं च बहुधा मम तिष्ठतु वेश्मनि ।

तथैवाकृष्टपच्यं च वनसंभवमस्तु ॥२६ ॥

गोमहिष्यादयो ग्राम्याः पशवः सन्तु मे गृहे ।

सदा यज्ञेन कल्पन्तामारण्याः पशवश्च मे ॥२७ ॥

वित्तं वित्तिश्च भूतं भूतिश्च वसतिर्वसु ।

शिवपूजादिकं कर्म शक्तिश्च शिवपूजने ॥२८ ॥

एमश्चास्तु ममेतिश्च गतिश्चास्तु शिवार्चने ।

अग्निरिद्धश्च मे सोमः सविता च सरस्वती ॥२९ ॥

पूषा बृहस्पतिर्मित्रस्त्वष्टा च वरुणश्च मे ।

धाता विष्णुरप्यस्तु गृहकर्मरस्तु मे ॥३० ॥

अश्विनौचममेशान तिष्ठतां सर्वदा गृहे ।

मरुतश्च प्रसर्पंतु विश्वेदेवाश्च मे गृहे ॥३१ ॥

त्वदाज्ञावशगानेतानग्नींद्रादिसुरान् शिव ।

मद्वशान्कुरु विश्वेश दक्षान्मद्गृहकर्मणि ॥३२ ॥

अन्तरिक्षं च पृथिवी द्यौरप्यस्तु दिशश्च मे ।

मूर्धा प्रजापतिश्चास्तु मे भवत्कृपया भव ॥३३ ॥

अꣳशुश्च रश्मिरप्यस्तु मेधाभ्योऽधिपतिश्च मे ।

उपाꣳशुरन्तर्यामश्च ममस्यादैन्द्रवायवः ॥३४ ॥

मे मैत्रावरुणश्चास्तु तथैवास्तु ममाश्विनः ।

प्रतिप्रस्थानशुक्रौ च मंथी चाग्रयणश्च मे ॥३५ ॥ (१५१)

वैश्वदेवो ध्रुवश्चापि तथा वैश्वानरश्च मे ।

ऋतुग्रहाश्च मे सन्तु सातिग्राह्याश्च शङ्कर ॥३६ ॥

ऐन्द्राग्नौ वैश्वदेवश्च ग्रहाः सोमोपयोगिनः ।

तथा मरुत्वतीयाश्च ग्रहाः सन्तु सदापि मे ॥३७ ॥

माहेन्द्रश्च तथादित्य सावित्रश्चास्तु मे ग्रहाः ।

सारस्वतश्च पौष्णश्च तथा पात्नीवतश्च मे ॥३८ ॥

स हारियोजनश्चास्तु ममेध्मश्चास्तु सर्वदा ।

बर्हिर्वेदिश्च धिष्णियाश्च स्रुचश्च चमसाश्च मे ॥३९ ॥

ग्रावाणः स्वरवः सन्तु तथैवोपरवाश्च मे।
ते मे धिषवणे सन्तु ते द्रोणकलशश्च मे ॥४० ॥

वायुव्यानि च मे सन्तु पूताभृच्चास्तु मे प्रभो।
तथैवाधवनीयश्च तदाग्नीद्रं च मे प्रभो ॥४१ ॥

हविर्द्धानं च मे स्वामिन्गृहाश्चैव सदश्च मे।
पुरोडाशाश्च मे स्वामिन्पचताश्च भवन्तु मे ॥४२ ॥

तथैवावभृतः सन्तु स्वगाकारश्च मे प्रभो।
अग्निर्घर्मश्च मेर्कश्च सूर्यः प्राणश्च मे प्रभो ॥४३ ॥

अश्वमेधश्च पृथिवी द्यौरप्यदिरस्तु मे।
मे शक्वरीरङ्गुलयो दिशश्च विदिशश्च मे ॥४४ ॥

तथा यज्ञेन कल्पन्तां ऋक्च साम च मे प्रभो।
स्तोम यजुश्च दीक्षा च तपश्चास्तु ऋतुश्च मे ॥४५ ॥

व्रतं चाहोरात्रयोर्वृष्ट्या तु नियमात्मकं।
बृहद्रथन्तरे यज्ञे कल्पेतां फाललोचन ॥४६ ॥

गर्भा वत्सश्च भगवन्त्र्यविश्चास्तु महेश्वर।
त्र्यवी च मे दित्यवाट्च दित्याही च सदाशिव ॥४७ ॥

पञ्चाविश्च महादेव पञ्चावि च त्रिलोचन।

त्रिवत्सश्च त्रिवत्सा च तुर्यवाट्चैव मे प्रभो ॥४८ ॥
तुर्यौही षष्ठवाच्चास्तु षष्ठौही च महेश्वर ।
उक्षा वंशा च ऋषभो वेहन्नड्वान् तथास्तु मे ॥४९ ॥
धेनुरप्यस्तु भगवन्क्षीरायाति मनोहर ।
यज्ञेन कल्पतामायुः प्राणो यज्ञेन कल्पताम् ॥५० ॥
अपानोऽपि स यज्ञेन व्यानेन सह कल्पतां ।
चक्षुः श्रोत्रं च यज्ञेन व्यानेन सह कल्पताम् ॥५१ ॥
वागात्मापि तथो यज्ञोप्येवं यज्ञेन कल्पतां ।
त्वदधीनमिदं सर्वं तवेति प्रार्थितं मया ॥५२ ॥
सर्वस्तंत्रोऽसि महेश यस्मा त्त्वमेव दातासि
तवापि देयाः ।
उक्ताश्च तावच्चमकेन देहि तान
स्वतन्त्रांछिवपूजकाय ॥५३ ॥
तेषां प्रदेयत्वविनिश्चयेन तां देहि मह्यं शिवपूजकाय ।
ते तावतस्मद्गृहकर्मयोग्याः योग्येन योगस्य
किलान्वयोपि ॥५४ ॥
एते पदार्थाः प्रथितास्त्वदीयास्ते शर्वदेया स्तव
दानयोग्याः । अहं शिवाराधन सक्तचित्तः कोऽवा

मदन्योस्ति स दानयोग्यः ॥५५ ॥

दातापि देये सति दानयोग्यं विहाय कस्मैप्रददाति भक्त्या । विद्वानतो देहि महेश तान्मे लोके मदन्यस्तु न कोऽपि पात्रम् ॥५६ ॥

त्वद्दत्तमेतादृशभाग्यमेत्य त्वत्पादपूजानिरतो भवानि ।
प्रमादलेशोऽपि तदा न बावि भवे भवे त्वत्पदपूजकस्य ॥५७ ॥

महाप्रभुः शंभुरुमासहायो दयामयो भूतिमयोऽपिदाता ।
माता पिता मे स हित प्रदाता धाता विधाता परमारसंदृक् ॥५८ ॥

मन्ये शङ्कर देवदेव तव तद्दातृत्वमव्याहतं तेनाग्निप्रमुखान्सुरानपि सदा तान्न स्वतन्त्रान्स्वतः ।
मह्यं देहि मदिच्छया परमिमा कुर्वन्तु कृत्यानि मे शक्तिर्यस्य यथा यथास्ति भगवन्सर्वस्वतन्त्र प्रभो ॥५९ ॥

देयत्वेन विनिश्चितास्तवसुराः सर्वेऽपि वेदैरपि

त्वं तव भाग्यमप्यविलयं भूयः समुज्जृंभते ।
अस्माकं तु महाप्रभुर्भवानैवेति चित्तं मुहुः
स्वानद्वांबुधिवीचिकातिचपला
लीलाविलासास्पदम् ॥६० ॥

॥ स्वस्ति श्री शिवरहस्ये हराख्ये तृतीयांशे पूर्वार्धे
शिलाद कृत चमक विधान प्रार्थनं चतुस्त्रिंशः ॥
॥ श्री साम्बसदाशिवार्पणमस्तु ॥



Mount Kailaash – South East Face